**भाषाशैली-**

बाणस्तु: पाञ्चालीप्रिय: -

**शब्दार्थयो: समो गुम्फ: पाञ्चाली रीतिरिष्यते।**
**शिलाभट्टारिकावाचि बाणोक्तिषु च सा मता।**

बाण: प्रायश: स्वरचनासु पाञ्चालीरीते: विभावनां प्रस्तौति। अस्य रचनासु पदपदार्थानां, मनोभावावेशानां यादृशं सुरुचिपूर्णं सामञ्जस्यमभिलक्ष्यते न तादृगन्यत्र क्वचिदवतरति दृष्टिपथम्। विषयवस्त्वनुरूप: पदविन्यासविलास एव अस्य रचनाया: वैशिष्ट्यम्।

कादम्बर्याम् अयं बाण:यत्र दीर्घसमासोपेतं वाक्यावलिं विन्यस्य वाचकानां पुरत: वर्णनबाहुल्यमुपस्थापयति तत्रैवलघुवाक्यानां प्रयोगेऽपि न मन्दायते। एतेन तत्प्रतिभाया: सर्वगुरुत्वं प्रकटीभवति। कपिञ्जल: पुण्डरीकं कामपीडितमुपदिशति-

''नैतदनुरूपं भवत: क्षुद्रजनक्षुण्ण एष मार्ग:, धैर्यधना हि साधव:, किं य: कश्चित्प्राकृत इव विकलीभवन्तमात्मानं न रुणत्सि, क्व ते तद् धैर्यम्, क्वासाविन्द्रियजय:।''

एवमेव शुकनासोपदेशे अल्पसमासयुक्तपदै: लघुवाक्यै: च सरसं वर्णनं कविना कृतम्। यथा-

**'इयं हि लक्ष्मी: पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, कालकूटान्मोहनशक्तिम्, मदिराया: मदम्, उच्चैश्रवस: चञ्चलताम् इत्येतानि सहवासपरिचयवशात् विरहविनोदचिह्नानि गृहीत्वेव सागरादुत्थिता।' तथा हि 'लब्धापि दु:खेन पाल्यते, न परिचयं रक्षति, नाभिजनमीक्षते, न रूपमालोक्यते, न शीलं पश्यति, न वैदग्ध्यं गणयति।'**

अत: बाणभट्टस्य माधुर्यगुणोपेतां ललितां पदावलीं दृष्ट्वा केनापि सत्यमेव उक्तम् यत्-

**रुचिरस्वरवर्णपदा: रसभाववती जगन्मनो हरति।**
**सा किं तरुणी? नहि नहि वाणी बाणस्य मधुरशीलस्य।।**

महाकविबाणस्य भाषाऽपि अतिसमृद्धा सर्वथा भावानुरूपा चास्ति। उत्तमानां निम्नानां च पात्राणां वर्णने, अच्छोदादिविधिप्राकृतिकवस्तुवर्णने सर्वत्र सजीवत्वं सृष्टं साफल्यं चासादितम्। अस्य बाणस्य भाषासमृद्धिं दृष्ट्वैव पाश्चात्यविद्वांस:कादम्बरीं अरण्यानीं मन्यन्ते। तेषां मते बाणस्य गद्यं खलु तद् भारतीयम् अरण्यं यत्र क्षुपोच्छेदं विना मार्गो दुर्लभ:। यत्र च बहव: अप्रतीतार्था: शब्ददन्दशूका: तत्र प्रविविक्षून् प्रतीक्षमाणा: निलीय स्थिता:।

वस्तुत: बाणभट्टस्य गद्य महाविशालसप्तभूमराजप्रासादोपमम्, यत्र क्वचन प्रकोष्ठेरमणीयाकृति-विशिष्टपरिधानापबृहितरमणीचित्रम् क्वचिन्मृगयोपयुक्तनानाजीवस्य चित्राणि, क्वचित्कलकलनिनादिनी खरस्रोता नदी चित्रिता, क्वचित्तपो-भूमिर्निदर्शिता, क्वचिच्च निपतत् शरभीषणा रणभूमि: अङ्किता। संस्कृतभाषाकविषु बाणभट्टसमान: कोऽपि शब्दचित्रप्रस्तुतौ सिद्धहस्त: नाभूत् इति कथनं नितान्त-सत्यम्। साधारणत: अन्ये कवय: घटनां वर्णयन्ति, परं तु बाण: चित्रोपस्थापनद्वारा कथां विस्तारयति, अत एव तस्य कथा मन्दं चलति। प्रभातसमये सूर्योदयवर्णन-प्रसङ्गे नानाविधै: उपमानै: प्रस्तुतं चित्रम् अतिसुन्दरं वर्तते।

एतत्सकलं वैशिष्ट्यं दृष्ट्वा गोवर्द्धनाचार्येण उक्तम्–

**जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि।**
**प्रागल्भ्याधिकमाप्तुं वाणी बाणो बभूवेति।।**

## हर्षचरितम्

'हर्षचरितम्' महाकविना बाणभट्टेन विरचिता एका प्रसिद्धा आख्यायिका अस्ति। बाणभट्टेन विरचितं ग्रन्थद्वयं प्राप्यते–हर्षचरितम् कादम्बरी च। चण्डीशतकम्, पार्वतीपरिणयः मुकुटताडितकम् इति त्रयोऽन्ये प्रबन्धाः तन्नाम्ना प्रथिता अपि वस्तुतः न तस्य कृतयः। अस्मिन् विषये विदुषां मध्ये मतैक्यं नास्ति। अतः ग्रन्थद्वयमेव बाणभट्टकृतिरूपेण प्रसिद्धम् अस्ति।

गद्यसाहित्याकाशे अस्य बाणभट्टस्य महती प्रसिद्धिः अस्ति। अस्य समयः प्रायेण निश्चितः अस्ति। अयं कविः सम्राट्हर्षवर्धनस्य समकालीनः आसीत्। महाराजहर्षदेवः ६०६ ईशवीयसमयात् आरभ्य ६४८ पर्यन्तं थानेश्वरनाम्नि स्थाने राज्यं कृतवान्। सः चायं हर्षः बाणभट्टेन स्वकीये हर्षचरिते सविशेषं वर्णितः। एतेन बाणभट्टस्य तत्समयवर्तित्वं प्रमीयते, तथा च बाणस्य समयः सप्तशतकं सिद्धयति।

बाणभट्टः वात्स्यायनवंशे जन्म गृहीतवान्। तत्पूर्वजाः बिहारप्रान्तस्थितस्य शोणाख्यस्य हिरण्यबाह्वपरनामकस्य महानदस्य तटे प्रीतिकूटनामकग्रामे न्यवसन्। तस्य पिता चित्रभानुः माता च राज्यदेवी आसीत्। बाणेन हर्षचरिते स्ववंशपरिचयः विस्तृतेन प्रदत्तः। कादम्बर्याम् अपि स्ववंशवर्णनं कृतवान्।

बाणभट्टेन बहुदेशाटनं कृतम्। देशभ्रमणेन तस्य प्रज्ञानप्रकर्षे महाँल्लाभो जातः। देशाटनात् परतः सः स्वगृहे अवस्थाय शास्त्राणाम् अध्ययने प्रावर्तत।

**प्रतिपाद्यः–**

'हर्षचरितम्' बाणभट्टेन विरचितः प्रथमः ग्रन्थः अस्ति। कादम्बर्याः अपेक्षया हर्षचरितम् प्रथमा रचना अस्ति। यतो हि कादम्बर्याः भाषाशैली हर्षचरितस्यतुलनायां अतिप्रौढ़ा अस्ति। 'हर्षचरितम्' अष्टोच्छ्वासेषु विभक्तम् एका आख्यायिका अस्ति। अत्र बाणेन स्वयमपि लिखितम्–

**तथापि नृपतेर्भक्त्या भीतो निर्वहणाकुलः।**
**करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम्।।**

ग्रन्थेऽस्मिन् प्रथमोच्छ्वासत्रये बाणेन स्वीया आत्मकथा लिखिता। चतुर्थादुच्छ्वासात् आरभ्य समाप्तिपर्यन्तं राज्ञः हर्षस्य चरितं वर्णितम्। हर्षस्य पितरौ यशोमती–प्रभाकरवर्धनौ आस्ताम्। ज्येष्ठः भ्राता राज्यवर्द्धनः, अनुजा राज्यश्रीः चासीत्। चतुर्थोच्छ्वासे राजकुमारयोः तत्स्वसुश्च जन्मवृत्तानि, पञ्चमे उच्छ्वासे राजकुमारयोर्विजययात्रा वर्णिता। हूणानां जयार्थे गते राज्यवर्धने हर्षे च मृगयां गते प्रभाकरवर्धनः मृतकल्पः जातः इति श्रुत्वा हर्षः मृगतयाः निवृत्तः। षष्ठे उच्छ्वासे राज्यवर्धनस्य परावर्तनम्, ग्रहवर्मणः मृत्युः, राज्यश्रियः बन्दीभावः, राज्यश्रियः उद्धाराय राज्यवर्धनस्य प्रस्थानम्, गौडेश्वरशशाङ्कद्वारा तस्य वधश्च वर्णितः।

सप्तमे उच्छ्वासे हर्षस्य दिग्विजययात्रा, मालेश्वरविजयः, अष्टमे राज्यश्रियः प्राप्तिः, दिवाकरमित्राख्यबौद्धभिक्षुणा सङ्गतिः। एवंविधया मूलकथा विस्तरेण अत्र वर्णिता।

**काव्यवैशिष्ट्यम्-**

कादम्बरीवत् इदं हर्षचरितम् अपि अपूर्णमेव स्थितम्। तत्रापि कारणं कुबेरसामयिकं मरणमेव मन्यन्ते विद्वन्मीमांसकाः। ऐतिहासिकांशं वर्जयित्वा सन्दर्भोऽयं सर्वथा काव्यलक्षणोपेतः।

ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम् इति गद्यं विशेषयताम् आलङ्कारिकाणां मते गद्यलेखकानां मूर्धन्यः बाणः, गद्यकाव्यानां प्रथमं च हर्षचरितम्। पाञ्चालीरीतेः भक्तः यथा बाणः तथा न कोऽपि अपरः। व्यञ्जनाप्रयोगे वक्रोक्तिरचनायां च बाणः सकलकविमूर्धन्यः।

इदं हर्षचरितम् न केवलम् उत्तमगद्यभावेनैव अत्यादरणीयम् अपितु सप्तमशतकस्य स्फुटेतिहासभावेनापि प्रशस्यतमम्। अत्र यत् ऐतिहासिकमितिवृत्तं वर्णितं तत् कस्मिंश्चिदप्यंशे तात्कालिकेतिहासात् न भिन्नम्। अस्मिन् तात्कालिकस्य उत्तरभारतस्य स्थितिः प्रकटं प्रकाश्यते। सप्तमे उच्छ्वासे वन्यग्रामाणां तत्रत्यगृहाणां वर्णनं नितान्तं सत्यं सरसञ्च। तस्मिन् कालेऽपि भारतम् सांस्कृतिकदृष्ट्या रमणीयम् आसीत्, एतत्सत्यं तदा प्रतीयते यदा वयं हर्षचरिते वेशभूषयोः आचारविचारयोः सेनासंस्थानस्य च वर्णनं पठामः। राज्यश्रियः विवाहावसरे विविधैः शिल्पैः, विविधैः जनैश्च प्रस्तुतानि आभूषणानि वस्त्राणि च भारतीयसंस्कृतेः उन्नतदशायाः वर्णनं स्पष्टरूपेण कुर्वन्ति इति।

## शिवराजविजयः

'शिवराजविजयः' पण्डितेन अम्बिकादत्तव्यासेन विरचितः संस्कृतसाहित्यस्य प्रथमः उपन्यासः अस्ति। उपन्यासः सर्वथा एका नवविधा अस्ति। संस्कृतजगति उपन्यासलेखनम् अनूदितसाहित्येन सह प्रादुर्भूत। अयं शिवराजविजयः संस्कृतस्य प्रथमः ऐतिहासिकः उपन्यासः अस्ति यः व्यासमहाभागेन १८७० ईसवीये वर्षे लिखितः। अयं ग्रन्थः एकोनविंशत्याः शताब्द्याः सर्वश्रेष्ठः सुललितः गद्यग्रन्थः अस्ति। यद्यपि व्यासमहोदस्य ७८ रचनाः सन्ति, परं तु एतस्य यशः शिवराजविजये एव प्रतिष्ठापूर्वकं अवलम्बितम् अस्ति।

शिवराजविजयस्य रचनाकारस्य पण्डितस्य अम्बिकादत्तव्यासस्य जन्म १९१५ संवत्सरे चैत्रशुक्लपक्षे अष्टम्यां तिथौ जयपुरे अभवत्। अस्य पूर्वजाः पाराशर-गोत्रीयाः ब्राह्मणाः आसन् ये जयपुरतः पूर्वस्यां दिशि स्थिते मानपुरानामके ग्रामे न्यवसन्। पश्चात् ते वाराणसीं गत्वा तत्रैव अवसन्। अम्बिकादत्तव्यासस्य पिता पण्डितः दुर्गादत्तव्यासः एकः कुशलः कथावाचकः आसीत्।

पण्डितः अम्बिकादत्तव्यासः बाल्यकालादेव बहुप्रतिभाशाली आसीत्। सः बहुभाषाविद् आसीत्। हिन्दी-संस्कृत-अंग्रेजी-बंगला-आदीनां भाषाणां उपरि समानरूपेण एकाधिकारः आसीत्। न्याय-व्याकरण-वेदान्तादिषु विविधदर्शनेषु अस्य असाधारणगतिः आसीत्। कविताकलायाम् ईदृशः प्रवीणः आसीत् यत् एकघटिकायामेव शतश्लोकानां रचनां कर्तुं समर्थः।

शतप्रश्नान् अविच्छिन्नकाल-व्यवधानेन एकवारमेव श्रुत्वा तेषां उत्तरं तत्क्रमेण एव दातुं अद्भुता क्षमता आसीत् अतएव सः 'शतावधानीकः' 'घटिकाशतकम्' इत्यादिभिः उपाधिभिः विभूषितः। स्वजीवनस्य अल्पकाले (केवलं ५२ वर्षकाले) व्यासमहोदयेन संस्कृतं बहूपकृतम्। शिवराजविजयरचनया सः गद्यसाहित्याकाशे-सुबन्धु-दण्डी-बाणभट्ट आदीनां कवीनां पङ्क्तौ विराजमानः भवति। शिवराजविजये वर्णिता कथा यद्यपि ऐतिहासिकप्रधाना, तथापि अम्बिकादत्तव्यासेन स्वप्रतिभया कल्पनया च उच्चकोटिसाहित्यिकतया विभूषिता। अत्र कथावस्तु संघटना प्राच्यपाश्चात्योः शिल्पविधानेन समन्विता अस्ति। अत्र कथाद्वयं समानरूपेण चलति। एकस्याः कथायाः नायकः वीरशिवाजी अस्ति अपरस्य च नायकः रघुवीरसिंहः अस्ति। कथाद्वयम् परस्परं पूरकम् अन्योन्याश्रितं चास्ति। शिवराजविजयस्य सम्पूर्णा कथा त्रिषु निःश्वासेषु अस्ति।

अस्मिन् शिवराजविजये इतिहासकल्पनयोः यथार्थादर्शयोः कल्पनानुभवयोः च सुसमन्वयः विद्यते। सर्वाणि पात्राणि स्वचरित्रनिर्वहणे पूर्णरूपेण पारङ्गतानि। शिववीरः, गौरसिंहः, रघुवीरसिंहः, यशवन्तसिंहः, अफजलखान्, शाइस्ताखान्, ब्रह्मचारी आदयः सर्वे स्वाभाविकतायाः यथार्थतायाः च निर्वहणे पूर्णतया सफलाः सन्ति। ब्रह्मचारिवर्णने कविः तस्य स्वाभाविकं चित्रम् उपस्थापयति- ''बटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चाऽऽसीत्।''

ब्रह्मचारिगुरुणा योगिराजकृते योगीनां यत् यथार्थं स्वरूपं प्रस्तुतम् तत् पूर्णरूपेण योगपरकम्- ''**भगवन्! बद्धसिद्धासनैः निरुद्ध-निःश्वासैः प्रबोधित-कुण्डलिनीकैः-विजितदशेन्द्रियैर्-नाहतनादतन्तुम् अवलम्ब्याऽऽज्ञाचक्रं संस्पृश्य चन्द्रमण्डलं भित्त्वा, तेजः पुञ्जमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य तत्रैव रममाणैर्मृत्युञ्जयैरानन्द-मात्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः।**''

**रसयोजना-**

यद्यपि शिवराजविजयस्य प्रधानरसः वीररसः अस्ति, तथापि अन्ये रसाः उपकारिरूपेण निरूपिताः सन्ति। काव्योद्देश्यानुरूपं वीररसस्य विशेषचित्रणं कृतमत्र। वीरशिवस्य शौर्यस्य यत् अद्भुतं वर्णनं विहितम् तत् अत्यन्तं स्पृहणीयम् अस्ति। गौरसिंहः अफजलखानं कथयति-

''**को नामापरः शिववीरात् ? स एव राजनीतौ निष्णातः स एव सैन्धरोह विद्यासिन्धुः, स मल्लविद्यामर्मज्ञः स एव बाणविद्यावारिधिः, स एव वीरवारवरः, पुरुषपौरुष-परीक्षकः स एव दीनदुखदावदहनः, स एव स्वधर्मरक्षणसक्षमः**''

पण्डितेन व्यासेन यत्र-तत्र शृङ्गार रसस्यापि चित्रणं कृतम्। अस्य शृङ्गारस्य सर्वत्र शिष्टं सात्त्विकं च वर्णनं कृतम्। कुत्रापि मादकतायाः उच्छृंखलतायाः दर्शनं लेशमात्रम् अपि नास्ति। यत्र-तत्र करुणरसस्यापि हृदयावर्जकं वर्णनं कृतमस्ति।

### अलङ्कारयोजना –

विरोधाभासः व्यासमहोदयस्य प्रियालङ्कारः अस्ति। विरोधाभासवर्णने सः बाणतुल्यः प्रतीयते। एतदतिरिक्तं दीपक–श्लेष–परिसंख्या–यथासंख्योदात्त–आदीनामपि अलङ्काराणां सम्यक् प्रयोगः कृतः अस्मिन् ग्रन्थे।

### भाषाशैली–

पण्डितस्य अम्बिकादत्तव्यासस्य भाषायाः उपरि पूर्णाधिकारः आसीत्। भावानुरूपं भाषायाः प्रयोगे सम्पूर्णतया दक्षः आसीत्। भावानां सरलस्वाभाविकयोः अभिव्यक्तये तस्य भाषा द्रष्टव्या–

व्यासेन शिवराजविजयान्तर्गते पाञ्चालीरीतिः प्रयुक्ता। एकत्र समस्तपदावल्याः प्रयोगः दृश्यते अन्यत्र तु लघुसमासशैल्यन्विता पदावलिः प्रयुक्ता अस्ति।

### प्रकृतिचित्रणम्–

प्रकृतिचित्रणेऽपि महाकविः व्यासः बाणभट्टतुल्यः। अनेन शिवराजविजये प्रकृत्याः चारुचित्रणं कृतम्। सूर्योदयस्य, सूर्यास्तस्य, चन्द्रोदयस्य, चन्द्रास्तस्य रात्रेश्च वर्णने अतिकुशलता प्रस्तुता अमुना कविना।

### सामाजिक–चित्रणम्–

शिवराजविजयः एकमात्रम् ईदृशः उपन्यासः अस्ति यत्र तात्कालिकसामाजिकदशानां चरित्राणाश्च समग्ररूपेण वर्णनं उपलभ्यते। साहित्यम् समाजस्य दर्पणम् भवति इत्यनुसारम् शिवराजविजयः पूर्णरूपेण तत्समयस्य चित्रणे सफलः।

पण्डितव्यासेन शिवराजविजये तत्कालीनमुगलसम्राज्यस्य सुन्दरं चित्रणं कृतम्। तस्मिन् समये राजानः अकर्मण्याः विलासप्रियाः आसन्। सम्पूर्णा हिन्दुजातिः मुगलानां (यवनानां) अत्याचारे पीडिता आसीत्। मुगलानां साम्राज्यः भारतवर्षे निरन्तरं वृद्धित्वं प्राप्य अग्रसरः आसीत्। यवनेभ्यः हिन्दुकन्यायाः अपहरणं, मन्दिरे देवमूर्तीनां विध्वंसः पवित्रधर्मग्रन्थानां विनाशः, अनाथहिन्दूनां प्रताडनं च सततं क्रियते स्म, हिन्दुराजानः मुगलशासकानां दासतां स्वीकृत्य तेषां कृपायाम् जीविताः आसन्।

अस्याम् विषमपरिस्थितौ महाराष्ट्राधीश्वरेण वीरशिवाजी द्वारा स्वशौर्यपराक्रम–सदाचरणेन हिन्दुप्रजायाः हिन्दुत्वस्य च रक्षणं कृतम्। तेन शिववीरेण हिन्दुजनानां मध्ये शौर्यस्यवीरतायाः च भावः पुनर्जागरितः। हिन्दुजनेषु देशभक्तेः, राष्ट्रभक्तेः, आत्मविश्वासस्य, स्वधर्मानुरागस्य, मातृभूमेः सेवाभावस्य भावना विकसिता शिवाजी द्वारा। हिन्दूनां उपरि यवनानां आत्याचारस्य चरमसीमा आसीत् तत्समये। व्यास महोदयेन तस्य स्वाभाविकं चित्रणं कृतम् –

**‘‘.......क्वचिद्दारा अपह्रियन्ते क्वचिद्धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः,क्वचिद्रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद्गृहनिपातः, इत्येव श्रूयते अवलोक्यते च परितः।’’**

एवं सम्यक् रूपेण शिवराजविजयस्य पर्यालोचनेन पण्डिताम्बिकादत्त–व्यासविषये ‘गद्यं कवीनां निकषं वदन्ति’ इत्युक्तिः सर्वथा समीचीना युक्तियुक्ता च प्रतीयते।

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. संस्कृतगद्यकाव्यस्य विशेषता अस्ति–

(क) समासबहुलता (ख) ओजसमासबहुलता

(ग) अल्पसमास बहुलता (घ) समासरहितबहुलता

२. 'वासवदत्ता' रचना वर्तते–

(क) सुबन्धोः (ख) दण्डिनः

(ग) बाणस्य (घ) अम्बिकादत्तस्य

३. 'हर्षचरितम्' इत्याख्यायिकायाः रचनाकारः अस्ति–

(क) बाणभट्ट (ख) सुबन्धुः

(ग) दण्डी (घ) अम्बिकादत्तः

४. संस्कृतसाहितस्य प्रथमः उपन्यासः अस्ति–

(क) कादम्बरी (ख) वासवदत्ता

(ग) दशकुमारचरितम् (घ) शिवराजविजयम्

### अतिलघूत्तरात्मक प्रश्नाः –

१. कादम्बर्याः उत्तरार्द्ध भागस्य कथा केन पूरिता ?

२. 'चण्डीशतकम्' इत्यस्य ग्रन्थस्य रचनाकारः कः ?

३. पं. अम्बिकादत्तस्य पितुर्नाम किम् ?

४. 'शतावधानीकः' 'घटिकाशतकम्' इत्यादिभिः उपाधिभिः कः प्रसिद्धः?

### लघूत्तरात्मकप्रश्नाः –

१. हर्षचरितस्य परिचयं संक्षेपेण लिखत?

२. शिवराजविजयस्य परिचयं संक्षेपेण लिखत?

### निबन्धात्मकप्रश्नाः –

१. बाणभट्टस्य भाषाशैल्याः समीक्षणं कुरुत?

२. शिवराजविजयमाश्रित्य तत्कालीन सामाजिकचित्रणं कुरुत ?

#### उत्तरमाला – वस्तुनिष्ठप्रश्नाः

१. (ख) २. (क) ३. (क) ४. (घ)

❀ ❀ ❀

## ( ग ) राजस्थानस्य अर्वाचीनसाहित्यकाराः

संस्कृतभाषायाः तदन्तर्गतस्य वाङ्मयस्य च विविधेषु वैशिष्ट्येषु एकम् असाधारणं वैशिष्ट्यं तस्य अखिल-भारतीयत्वम् अस्ति। हिन्दी-मराठी-कन्नडादि-वाङ्मय-शाखासु एतद् वैशिष्ट्यं नास्ति। अतः अखिलभारतीयदृष्ट्या तत्सर्वं तद्गुणसमृद्धम् अपि प्रादेशिकं वाङ्मय वक्तुं युज्यते। परं तु संस्कृतवाङ्मयस्य इतिहासे प्राचीनकालतः प्रारभ्य इदानीं यावत्, विविधप्रदेशवास्तव्यानां महाकवीनां, दार्शनिकानां, भाष्यटीकादिकर्तॄणां भूयांसि नामधेयानि लभ्यन्ते।

आधुनिकाले तत्तत्प्रदेशोद्भूतस्य संस्कृत-वाङ्मयस्य पर्यालोचनपराः बहवः प्रबन्धाः प्रकाशम् आगताः। तेषु शोधप्रबन्धेषु यद्यपि तत् तत् प्रदेशवासिनां ग्रन्थानां समीक्षणं वर्तते तथापि तत्र कापि प्रादेशिकी संसृष्टिरपि दृष्टिपथम् आयाति। यथा च तंजौरराज्योद्भवानां संस्कृतोपासकानां नामावल्यां बहूनि केरलीयानां, महाराष्ट्रीयाणां कर्नाटकस्थानां च नामानि उपलभ्यन्ते। काशीस्थितेषु गन्थकर्तृषु न केवलम् उत्तरप्रदेशीयाः एव अपितु बङ्ग-कलिङ्ग-नेपाल-बिहारादि-प्रदेशीयानां विद्यन्ते। तथैव राजस्थानेऽपि भारतवर्षस्य विविध-प्रदेशात् आगत्य सरस्वतीसमुपासकाः संस्कृतशारदायाः सेवाम् अकुर्वन्। इत्थं बहुविध-रचनाभिः संस्कृतभाषा निरन्तरम् उपकृता।

एकोनविंशति-विंशति-शताब्दीमध्ये बहुभिः विद्वद्भिः बहुविधविषयेषु उन्नतं लेखनकार्यं कृतम्। अत एव राजस्थानस्य राजधानी 'जयपुरम्' तु अपरा काशी इति नाम्ना सुविख्यातं संस्कृत-जगति।

अत्र विविधविधानां लेखनकार्यानुरूपं राजस्थानप्रान्तस्य विशेषसन्दर्भे आधुनिकसंस्कृत साहित्यकाराणां परिचयः प्रस्तूयते-

### श्रीसीतारामभट्ट पर्वणीकरः -

श्रीसीतारामभट्ट पर्वणीकरः पर्वणीकुलप्रवर्तकस्य श्रीमाधवभट्टस्य कनिष्ठः भ्राता आसीत्। पर्वणीकरवंशस्य मूलोद्गमस्थानं महाराष्ट्रे नासिकजनपदे स्थितः पर्वणी नामकः ग्रामः अस्ति। अयं कविः सवाई-जयसिंहस्य राज्याश्रितः कविः आसीत्। इतिहासे जयसिंहशासनकालः १८१८ ईशवीतः १८३४ ईशवीयपर्यन्तम् आसीत्। अतः सीतारामभट्टपर्वणीकरस्य स्थितिः एकोनविंशत्याः शताब्द्याः पूर्वार्द्धे आसीत्।

अयं कविः एकः महान् काव्यकारः आसीत्। अनेन विरचितेषु महाकाव्येषु 'ईश्वरविलासः' महाकाव्यं सुप्रसिद्धम् अस्ति। अस्मिन् ऐतिहासिककाव्ये जयपुरशासकस्य ईश्वरीयसिंहस्य तस्य पूर्वजानां क्रमिकं वर्णनम् अस्ति। इदं काव्यं चतुर्दशसर्गे निबद्धम् अस्य अङ्गीरसः वीररसः अस्ति। अत्र वैदर्भ-गौडीपाञ्चाली-आदयः रीतयः यथास्थानं प्रयुक्ताः सन्ति। अस्मिन् महाकाव्ये अलङ्कार-रस-वर्णनवैविध्य-भाषादिदृष्टिभिः महाकवेः अद्भुतकाव्यप्रतिभायाः दर्शनं भवति। एतदतिरिक्तम् अन्येषु महाकाव्येषु-जयवंशम्, नलविलासः, नृपविलासः, राघवचरितम्, लघुरघुकाव्यम् आदयः काव्यग्रन्थाः प्रमुखाः सन्ति। एतेषां महाकाव्योपरि राजस्थानविश्वविद्यालये नैकशोधकार्याणि सम्पादितानि।

## राजवैद्यः श्रीकृष्णरामभट्टः–

श्रीकृष्णरामभट्टेन विरचितं प्रसिद्धं महाकाव्यम् 'कच्छवंश' महाकाव्यम् अस्ति। अयं कविः जयपुरनरेशस्य राजवैद्यस्य श्रीकुन्दनरामभट्टस्य ज्येष्ठः पुत्रः आसीत्। भवतः जन्म राजस्थानस्य राजधान्यां जयपुरे १९०५ विक्रम संवत्सरे श्रीकृष्णजन्माष्टम्यां तिथौ अभवत्। भवान् जीवनाथ ओझा महाभागात् चन्दनदास-स्वामिनः शिक्षां प्राप्तवान्। अस्य उल्लेखः कविना 'जयपुरविलासे' स्वकाव्ये कृतम्-

**येनाशिक्षि स जीवनाथगुरुतः काव्यप्रकाशाशयः,**
**छन्दश्चन्दनदासतः सगणितं वैद्यागमस्तातत:।**
**सूते गन्धकजारणाविधि कृता येन क्रिया नैकशः,**
**सोऽहं नूतनकाव्यपश्चककृतिः श्रीकृष्णशर्माकविः।।**

श्रीकृष्णरामभट्टः जयपुरस्थिते महाराजा संस्कृतमहाविद्यालये आयुर्वेदस्य व्याख्याता आसीत्। भवतः १९५४ ईसवीये वर्षे स्वर्गलाभः जातः।

श्रीकृष्णरामभट्टविरचितेषु महाकाव्येषु 'कच्छवंशमहाकाव्यम्' सुप्रसिद्धम् अस्ति। अस्मिन् जयपुरस्य कच्छवाहा-वंशीयशासकानां जीवनचरितम् १९ सर्गेषु वर्णितम्। अस्य भाषालालित्यं पदप्रयोग-पाण्डित्यञ्च प्रशंसनीयमस्ति।

'जयपुरविलासः' अनेन कविना सुरचितं रमणीयं खण्डकाव्यम् अस्ति। इदं खण्डकाव्यम् पञ्चसर्गेषु विभक्तम् अस्ति। अस्मिन् जयपुरस्य तात्कालिकस्थितेः चित्रणम् अस्ति। अस्य काव्यस्य कलापक्षः अत्युन्नतः समृद्धः चास्ति, परं तु भावपक्षस्य उत्कृष्टा तथैव नास्ति, तथापि अस्य काव्यस्य भाषा-शैली सरला, सरसा, हृदयग्राह्या चास्ति। भाषायां स्वाभाविकः प्रयोगः, वैदर्भीरीतेः विशुद्धरूपेण प्रयोगः च कृतः अत्र।

यमकालङ्कारस्य प्रयोगः रमणीयः, यथा-

**सकलया कलया किल शिल्पिभिः, रचितयाऽर्चितयालयमालया।**
**जयपुरं जयति क्षितिमण्डले, विमलया मलयाद्रिगुणाढ्यया।।**
**अतिविलक्षण-लक्षण-लक्षिता, ललितगीतिगतिस्फुटमङ्गला।**
**जयपुरमहती महिताहिता, महिमतो हिमतोषितमानवाः।।**

अत्र यमकालङ्कारेण सह अनुप्रासजन्यमाधुर्यः अपि चित्ताकर्षकरूपेण दृश्यते। छन्दोयोजनायां अयं कविः हिन्द्याः दोहाच्छन्दतः प्रभावितः दृश्यते। एकम् उदाहरणं द्रष्टव्यम्-

**व्याकुलता जयपत्तने नो पवनादपरत्र।**
**सरोगता कमलैर्विना भाति न कुत्रचिदत्र।।**

## पं. श्री सूर्यनारायणशास्त्री-

पण्डितः श्रीसूर्यनारायणशास्त्री व्याकरणाचार्यः आसीत्। तस्य जन्म हरियाणाप्रान्तान्तर्गते महेन्द्रगढ़स्थिते गौडपरिवारे १९४० विक्रमाब्दे अभवत्। तस्य शिक्षा जयपुरे अभवत्।

सः जयपुरे स्थिते महाराजासंस्कृत-महाविद्यालये प्राध्यापकः विभागाध्यक्षश्च आसीत्। जयपुरतः प्रकाश्यमानायाः मासिक-पत्रिकायाः 'संस्कृतस्य रत्नाकरस्य' आजीवनसदस्यः आसीत् सः। एतस्य सम्पूर्णाः रचनाः अस्याम् पत्रिकायामेव प्रकाशिताः।

'मानवंश' महाकाव्यम् पण्डितशास्त्रिणा विरचितं सुप्रसिद्धं महाकाव्यम् अस्ति। काव्यमिदम् १९ सर्गेषु निबद्धम्। इदमेकम् ऐतिहासिकं महाकाव्यम् अस्ति। अस्मिन् जयपुरनरेशस्य मानसिंहस्य पूर्वजानाञ्च वर्णनं कृतम्। रघुवंश-शैल्याधारिता इयं अद्वितीया कृतिः। जीवनस्य विविधपक्षाणां स्वाभाविकचित्रणम् अस्य प्रमुखविशेषता अस्ति। भावपक्षस्य कलापक्षस्य च रुचिरं सामञ्जस्यम् अपि अत्र उपलभ्यते। वीररसप्रधानतया ओजगुणस्य स्वाभाविकः समावेशः, परं तु प्रसादस्य अपि छटा हृदयावर्जका विद्यते। अलङ्काराणां प्रयोगः अपि सम्यक् प्रकारेण कृतः। एकम् उदाहणम् द्रष्टव्यमस्ति ।

मानवंशमहाकाव्यात् अतिरिक्तं शास्त्रिमहोदस्य प्रसिद्धिं प्राप्तं काव्यद्वयम् उपलभ्यते-कृष्णदूतम् उद्योगलहरी च। 'कृष्णदूतस्य' दूतपरम्परायाम् महत्त्वपूर्णं स्थानं विद्यते। अस्य खण्डकाव्यस्य कथानकं महाभारतात् आहरितम्। अस्मिन् कालिदासस्य मेघदूतस्य प्रभावः स्पष्टतया दृश्यते।

'उद्योगलहरी' अपि कवेः संस्कृतलहरी काव्येषु विशिष्टा। अत्र मानवस्य समस्तनैतिकोन्नतेः उद्योगमेव कारणरूपेण व्याख्यातम्।

## पण्डितः विद्याधरशास्त्री–

पण्डितविद्याधरशास्त्रिणः जन्म आंग्लपञ्चाङ्गानुसारम् सन् १९०१ ईसवीये अगस्तमासे चतुर्थ्यां तिथौ राजस्थानस्य 'चूरू' जनपदे अभवत्। अस्य पिता पण्डितदेवीप्रसादशास्त्री प्रकाण्डः पण्डितः आसीत्। अस्य पितामहः पण्डितः हरनामदत्तशास्त्री भारतीयस्तरे ख्यातिप्राप्तः विद्वान् आसीत्।

पण्डितेन शास्त्रिणा स्वपितामहोपरि 'हरनामामृतम्' नामकं १६ सर्गाणां महाकाव्यं विरचितम्। अस्य महाकाव्यस्य नायकः पण्डितहरनामदत्तः एव अस्ति। महाकाव्यस्य प्रमुखस्थलेषु मरुप्रदेशस्य वर्णनम्, नायकस्य बाल्यावस्थायाः, छात्रावासजीवनस्यच वर्णनं विशेषरूपेण उल्लेखनीयम्। नायक-जीवनस्य सर्वपक्षस्य साङ्गोपाङ्गं वर्णनमत्र विद्यते। अस्मिन् महाकाव्ये भाषाशैल्याः सहजता सरलता च विशेषतः उल्लेखनीया। अस्य ११ सर्गे वर्णितस्य वैराग्य-भावनायाः सम्यक् चित्रणं द्रष्टव्यम्–

**शान्तोऽप्यशान्ताज्जातो मनस्वी कौवेरकाशीः बहुधा जगाम।**
**गुहागतः कश्चन् यत्र सिद्धः प्रबोधयामास बुधं तमित्थम्।।**

अयं महाकविः बाल्यकालादेव संस्कृतभाषाप्रयोगे निष्णातः आसीत्। १५ वर्षीये लघ्ववस्थायामेव अनेन 'शिव-पुष्पांजलिः' नामकं स्तोत्रं रचितम्। एषः बीकानेरस्थिते डूंगरमहाविद्यालये प्रवक्तापदं विभागाध्यक्ष-पदञ्च अलङ्कृतवान्। तत्रैव 'हिन्दीविश्वभारती' इति नाम्नी संस्था स्थापिता तेन। राष्ट्रपति-पुरस्कारेणापि विभूषितः सः। सन् १९८३ ईसवीये फरवरी मासे स्वर्गं प्राप्तवान्।

## आचार्यः मधुकरशास्त्री–

आचार्यमधुकरशास्त्रिणः जन्म जयपुरसमीपस्थिते रामपुराग्रामे अभवत्। अस्य पितुर्नाम घासीलाल जोशी अस्ति, यः कोटानगरस्थितस्य राजस्थान-प्राच्यविद्याप्रतिष्ठानस्य नियंत्रकपदात् सेवानिवृत्तः। आचार्यशास्त्रिणा विरचितं प्रसिद्धं महाकाव्यम् 'श्रीमहावीरसौरभम्' अस्ति। १६ सर्गेषु निबद्धमिदं महाकाव्यम् तीर्थंकरस्य भगवतः महावीरस्य जीवनस्य वर्णनस्वरूपम् अस्ति। अस्य रचना आचार्येण निर्धारितमानबिन्दूनां अनुसारेण कृता। प्रत्येके सर्गे यथोचितं छन्दः परिवर्तनं कृतमस्ति।

अस्य महाकाव्यस्य भाषा सरला चास्ति। दीर्घसमस्तपदानां प्रयोगः प्रायेण न कृतः रसयोजनाऽपि समुचितदृष्ट्या प्रस्तुता। कविना अत्र उद्घोषितम् यत् भगवता महावीरेण स्याद्वादस्य अनेकान्तवादस्य वा उपदेशः प्रजातांत्रिक-भावनायाः विकासार्थम् प्रदत्तः-

**समाजसंघर्षविनाशहेतोः स्याद्वाद-भाषामदिशत् प्रभुस्सः।**
**भुवि प्रजातान्त्रिकपद्धतीनां मूलं त्वनेकान्तसुचिन्तनं च॥**

## श्रीपद्मदत्त ओझा (पद्मशास्त्री)–

'लेनिनामृतम्' महाकाव्यस्य रचयिता श्रीपद्मदत्तः ओझा अस्ति। अस्य जन्मस्थली उत्तरप्रदेशस्य अल्मोड़ाजनपदे अस्ति। उत्तरप्रदेशस्यैव विभिन्नस्थलेषु शिक्षां प्राप्तवान्, परं तु अस्य कार्यस्थली राजस्थानम् अस्ति।

इदं महाकाव्यं महाकविना श्रीपद्मदत्तः ओझा-महोदयेन सन् १९७५ ईसवीये वर्षे रचितम्। इयं कृतिः विश्वेश्वरानन्दवैदिकशोधसंस्थानतः प्रकाशिता अस्ति। अस्य महाकाव्यस्य लेखनस्य प्रेरणा ब्यावरनिवासीकुमारानन्दस्वामिना प्राप्ता। स्वामी कुमारानन्दः १९१३ ईशवीयवर्षे लेनिनात् दीक्षितः। निरन्तरं कुमारानन्दसम्पर्कात् श्रीपद्मदत्तओझा साम्यवादेन प्रभावितः भूत्वा इदम् ऐतिहासिकं महाकाव्यम् अरचयत्।

अस्मिन् महाकाव्ये लेनिनस्य जीवनवृत्तं वर्णितम्। अस्मिन् १५ सर्गाः सन्ति। कविवरेण पद्मदत्तशास्त्रिणा अत्र कार्लमार्क्सस्य वर्ग-संघर्ष-सिद्धान्तस्य, रूसदेशस्य प्राकृतिकशोभायाः, लेनिनस्य जन्मनः, तस्य शिक्षा-दीक्षायाः, साईबेरियाकारावासस्य, तेन स्थापितनवसमाजवादीदलस्य 'जारतन्त्रस्य' पतनस्य, स्वतन्त्रताप्राप्तेः लेनिनस्य बन्दीगृहीतस्य, प्राणदण्डस्य घोषणायाः, क्रेमलिननगरे लेनिनस्य स्वागतस्य, तस्य देहावसानस्य भारतरूसमैत्रीप्रसङ्गस्य च सरल-भावानुकूल-भाषामाध्यमेन वर्णनं कृतमस्ति।

अस्य महाकाव्यस्य प्रधानरसः वीरः, अन्येषां रसानामपि समुचितः प्रयोगः। अलङ्काराणामपि यथास्थानं सुन्दरः प्रयोगः कृतः। अत्र उपमायाः एकः प्रयोगः द्रष्टव्यः, यत्र गर्भभारेण खिन्ना मारिया हिंस्रपशुमुखात् विसृष्टा भयभीतहरिणीतुल्या प्रतीयते-

**सूर्यातपे गर्भभरेण खिन्ना लतागृहं प्राप्य समाश्वसन्ती।**
**विलक्ष्यते हिंस्रमुखाद् विमुक्ता विमुक्तयूथा हरिणीव भीता॥**

एतत् महाकाव्यमाधारीकृत्य अयं महाकविः सोवियतभूमिनेहरूपुरस्कारेण सम्मानितः।

## श्रीगोस्वामी हरिरायः–

श्रीगोस्वामी हरिरायविरचितं प्रसिद्धं महाकाव्यं 'जरासन्धवधम्' अस्ति। श्रीहरिरायस्य जन्म राजस्थानप्रान्ते जोधपुरजनपदे चौपासनी ग्रामे १९५० ईसवीये वर्षे मई मासे २२ तिथौ, तदनुसारम् ज्येष्ठशुक्लपञ्चम्यां तिथौ २००९ संवत्सरे अभवत्। अस्य पिता श्रीगोस्वामी ब्रजभूषणलाल महोदयः आसीत्। भवतः शिक्षा-दीक्षा गुजरातप्रान्ते जामनगरे अभवत्। सः बाल्यकालादेव प्रतिभाशाली आसीत्। १३ वर्षस्य अल्पावस्थायाम् एव प्रथमं काव्यं पूर्णं कृतम्। राजकीयसंस्कृतमहाविद्यालयस्य प्राचार्यः श्रीरामदासकौण्डिन्यः भवतः परमादरणीयः गुरुः आसीत्। 'प्रणय-परिणये' नामके महाकाव्ये भवता सम्मानपूर्वकं तस्य स्मरणं कृतम्–

**साहित्यशास्त्राम्बुधिगूढतत्त्वं यत्सन्निकर्षेण मयाध्यगामि।**
**गुरुं रसज्ञं किल रामदास-कौडिन्यनामानमहं स्मरामि।।**

श्रीहरिरायेन महाकविमाघस्य काव्यशैलीम् अनुसृत्य 'जरासन्धवधम्' महाकाव्यम् विरचितम्। इदं तथ्यं स्वयमेव कविना महाकाव्यस्य २० सर्गे स्वीकृतम्–

**काव्यान्तरे वायसतीर्थदृष्टः लक्ष्मीपतेः कीर्तनमात्रचारौ।**
**माघप्रबन्धे यदि पक्षपातो विपश्चितां माऽनुचितो विमातु।।**

इदमपि महाकाव्यं शिशुपालवधानुरूपं २० सर्गे निबद्धम्। अस्य शैली पाञ्चाली, अङ्गी रसः वीररसः अस्ति। अन्येषामपि रसानां समुचितः प्रयोगः कृतः अत्र कविना।

## डॉ. रसिकबिहारी जोशी –

डॉ. रसिकबिहारीजोशीमहोदयस्य जन्म नागपुरे एकस्मिन् प्रतिष्ठितवैष्णव-परिवारे १९२७ ईसवीये सितम्बरमासे १२ तिथौ अभवत्। भवतः परिवारः विद्वत्परम्परायां अग्रगण्यः। भवतः पिता पण्डितः रामप्रतापशास्त्रिमहोदयः नागपुरविश्वविद्यालये संस्कृत-पाली-हिन्दी-मराठी-बंगाली-तमिल-तेलगू-आदीनां विभागानाम् अध्यक्षः आसीत्। ४३ वर्षीयावस्थायां पण्डितरामप्रतापमहोदयः राजस्थानम् आगत्य ब्यावरनगरे निवासं अकरोत्। अस्मात् कारणात् जोशी-महोदयस्य प्रारम्भिकी शिक्षा ब्यावरनगरे एव सम्पन्ना। भवता व्याकरणस्य, दर्शनस्य, अलङ्कारस्य च विशिष्टं अध्ययनं कृतम्। पश्चात् भवता वाराणसीतः पीएच.डी. उपाधिः, पेरिसविश्वविद्यालयतः डी.लिट्. उपाधिश्च लब्धा। भवान् लखनऊ-जोधपुर-दिल्ली विश्वविद्यालयेषु संस्कृतस्य आचार्यः आसीत्।

भवता 'मोहभङ्गं' नामकं प्रसिद्धं महाकाव्यं विरचितम्। अष्टसर्गात्मकस्य अस्य कथावस्तु पौराणिकी अस्ति। विष्णुपुराणस्य चतुर्थांशस्य द्वितीयाध्याये सौमरिवृत्तान्तमाश्रित्य इदं महाकाव्यं सुरचितम्। अत्र मोहभङ्गस्य मानसिकघटनायाः अपि महत्त्वपूर्णं स्थानं प्रदत्तम्।

मानवमात्रस्य हृदये निरन्तरम् उत्पद्यमानस्य द्वन्द्वस्य प्रवृत्तिः अङ्किता अत्र। सौमरिमाध्यमेन कविना इदं सत्यं प्रकाशितं यत् ज्ञान-तपस्या-भक्तिबलेन वासनायाः यद्यपि निरोधः सम्भवः तथापि सर्वथा न।

श्रेयप्रेयमार्गयोः श्रेयमार्गस्य वरणस्य उपदेशः एव अत्र दिष्टः।

एतदतिरिक्तं भवता करुणाकटाक्षलहरी सारस्वतगीतिकाव्यम्, प्रज्ञापारिजातम्, श्रीगोवर्धनगौरवम् इत्यादयः ग्रन्थाः विरचिताः। भवान् उत्तरप्रदेश-संस्कृत-अकादमीतः, मध्यप्रदेश-संस्कृत-अकादमीतः कालिदासपुरस्कारेण सम्मानितः। १९८४ ईसवीये वर्षे राजस्थान-संस्कृत-अकादमीतः 'श्रीहारीतऋषिः' पुरस्कारेण अनन्तरं राष्ट्रपति-पुरस्कारेणापि च पुरस्कृतः।

## पं. गुलाबचन्द्रचूलेटः –

पण्डितः गुलाबचन्द्रचूलेटः राजस्थानप्रान्तस्य जयपुरजनपदस्य नायन-अमरसरग्रामस्य निवासी अस्ति। भवतः पितामहः श्रीसीतारामशर्मा, पिता श्रीहनुमानसहाय शर्मा अस्ति। भवान् व्याकरणस्य लब्ध प्रतिष्ठितः विद्वान् अस्ति। राजस्थानसर्वकारे विद्यालयीयशिक्षायाम् संस्कृतशिक्षकरूपेण कार्यम् अकरोत्।

भवता विरचितं 'श्रीकृष्णचरितामृतम्' तथा 'महारथी' महाकाव्यं राजस्थानार्वाचीनासु संस्कृतकृतिषु उल्लेखनीयम् अस्ति। भवान् १९९१ ईसवीये वर्षे राजस्थान-संस्कृत-अकादम्याः 'माघ-पुरस्कारेण' विभूषितः।

अस्मिन् 'महारथी' इति महाकाव्ये २१ सर्गाः सन्ति। महारथीकर्णस्य जीवनस्य प्रमुखानां घटनानां चित्रणम् अत्र कृतम्। सर्गरचनाकथावस्तुविकासः, रसयोजना च सर्वाः शास्त्रीययोजनानुरूपाः सन्ति।

## श्रीनिवासाचार्यः –

श्रीनिवासाचार्यस्य जन्म राजस्थानस्य 'चूरू' जनपदे अभवत्। अस्य पिता पण्डितः नौरंगरायशास्त्री संस्कृतस्य प्रकाण्डः पण्डितः आसीत्। श्रीनिवासाचार्योपरि तस्य पूर्णः प्रभावः आसीत्।

अतः एतेन १९३३ ईसवीयस्य समीपे 'चन्द्रमहीपतिः' इति एकः उपन्यासः रचितः। एतस्य प्रकाशनं स्वतन्त्रताप्राप्तेः पश्चात् अभवत्। अस्मिन् उपन्यासे राजकुमारस्य राजकुमार्याः च प्रणयप्रसङ्गस्य वर्णनम् प्रस्तुतम्। खलनायकस्य विधानमपि अत्र कृतम् यः प्रणयप्रसङ्गे बाधामुपस्थापयति। परं तु नायकः बाधां समुत्तीर्य नायिकया सह सुखेन मिलति। उपन्यासस्य नायकः राज्ञः नवेन्दुपालस्य पुत्रः चन्द्रः तथा च नायिका विलासपुरस्य राज्ञः रामपालस्य पुत्री कमला अस्ति। कान्तिसिंहः अस्ति खलनायकः।

अयं उपन्यासः यद्यपि गद्ये लिखितः परं तु मध्ये चित्रकाव्यस्य योजना, विशेषतः एकाक्षर-द्व्यक्षरकाव्यस्य समावेशः रसभङ्गं करोति। सर्वतः पर्यालोचनेन इदं ज्ञायते यत् भाषाव्याकरणोपरि उपन्यासकारस्य पूर्णाधिकारः अस्ति।

## पं. नवलकिशोरशास्त्री कांकरः–

भवतः जन्म जयपुरनगरे १९६१ संवत्सरे आषाढकृष्णत्रयोदश्यां तिथौ अभवत्। भवतः पिता पण्डितः गणेशनारायणशर्मा आसीत्। पण्डितः नवलकिशोरशास्त्री कांकरः लघुकाश्याः मूर्धन्यः विद्वान् अस्ति। गद्यसम्राट्-साहित्यकाव्यतीर्थ-व्याकरणशास्त्री-साहित्याचार्य-इत्यादिभिः उपाधिभिः विभूषितः

अस्ति एषः कविः।

भवान् राजकीये संस्कृतमहाविद्यालये राजगढ़े (अलवरजनपदे) किञ्चित्वर्षपर्यन्तं प्रधानाध्यापकपदे कार्यरतः आसीत् पश्चात् जयपुरस्थिते पारीकविद्यालये, क्रमोन्नते पारीकमहाविद्यालये हिन्दीविषये संस्कृतविषये च अध्यापनकार्यम् अकरोत्। १९१८ ईसवीये वर्षे अस्मात् महाविद्यालयात् एषः सेवानिवृत्तः।

अध्यापनेन सहसाहित्यसर्जने अपि भवान् अग्रगण्यः। भवतः लेखनक्षेत्रम् अपि विस्तृतम् अस्ति। भवता विभिन्नेषु विषयेषु पञ्चाशताधिकाः कृतयः रचिताः सन्ति। भवान् राष्ट्रपतिपुरस्कारेणापि अलंकृ तः अस्ति।

'यात्राविलासम्' भवता विरचितः एकः प्रौढः उपन्यासः अस्ति। अस्य प्रकाशनं १९९३ ईसवीये वर्षे अभवत्। अत्र भवता स्वजीवनस्य एव यथार्थानाम् अनुभवानाम् अङ्कनं कृतम्। वस्तुतः अयं उपन्यासः विभिन्नानां तीर्थस्थलानां यात्रा सम्बद्धा दर्शनसम्बद्धा च उत्कृष्टा रचना विद्यते। अस्मिन् उपन्यासे कुत्रचित् बाणभट्टशैल्याः अनुकरणम् तु कुत्रचित् अम्बिकादत्तशैल्याः अनुकरणम् दृश्यते। अत्र भाषा अधिकांशतः समस्तपदावलीयुक्ता तु कुत्रापि नवीनशब्दावल्या अन्विता अस्ति। भाषाशैल्याः एकम् उदाहरणम् द्रष्टव्यम्–

''विष्णुरिव लक्ष्मीपतिः सुदर्शनं सुन्दरश्च। ब्रह्मेव हिरण्यगर्भः प्रजापतिश्च। शिव इव महेश्वरः सर्वमङ्गलाधीशश्च। बुद्ध इव सर्वदा शास्ताच। अहह, अत्र स्त्रीसंहतिरपि गौरी पद्मालया, चञ्चला इन्द्राणीकृतहृदया च। अतो निश्चप्रचं प्रचुरतरहिरण्यगर्भा प्रभूततरमाधवाः, पुरुषपशुपतयश्च लोकारित्रिदिवमतिशेरते स्म।''

## महामहोपाध्यायः स्व. पं. गिरिधरशर्मा चतुर्वेदी –

भवतः जन्म जयपुरनगरे १९३९ विक्रमसंवत्सरे अभवत्। भवतः पिता गोकुलचन्द्रः चतुर्वेदी आसीत्। भवतः शिक्षा-दीक्षा जयपुरे एव अभवत्। भवान् जयपुरस्थितमहाराजासंस्कृतमहाविद्यालयात् व्याकरणाचार्य-परीक्षां प्रथमश्रेण्याम् उत्तीर्णं कृतवान। भवतः गुरुजनेषु, पण्डितः मधुसूदनओझा-पण्डितः शिवकुमार-शर्मा, पं. दामोदरशास्त्री-पं. गोविन्दशास्त्री, प्रमुखाः सन्ति।

छात्रावस्थायामेव मित्रगणसाहाय्येन 'संस्कृत-रत्नाकरः' नाम्ना पत्रिका भवता प्रकाशिता सम्पादिता च। पश्चात् भट्ट-मथुरानाथशास्त्रिणा इयं पत्रिका कुशलतापूर्वकं सम्पादिता।

चतुर्वेदीमहोदयेन १९०७ ईसवीं आरभ्य १९४४ पर्यन्तम् विभिन्न-स्थानेषु अध्यापनकार्यं कृतम्। १९२८ ईसवीये वर्षे भवान् महाराजासंस्कृतमहाविद्यालयस्य अध्यक्षः नियुक्तः।

१९४४ ईसवीये वर्षे अत्रतः सेवानिवृत्तः। सेवानिवृत्यनन्तरं हिन्दूविश्वविद्यालयस्य काश्याः संस्कृतानुसन्धानविभागस्य अध्यक्षता अपि चतुर्वर्षपर्यन्तं भवता कृता।

काशीनरेशस्य विशेषानुरोधे पौराणिकान् विषयान् अधिकृत्य भवता नैकाः ग्रन्थाः विरचिताः। भवता

विरचितेषु ग्रन्थेषु 'प्रमेयपारिजातम्', 'वेदविज्ञानबिन्दुः', 'वैदिकविज्ञानम्', 'भारतीयसंस्कृतिः' इत्यस्मिन् ग्रन्थे भवान् केन्द्रीयसंस्कृत-अकादमीतः पुरस्कृतः जातः। भारतस्य राष्ट्रपतिना सर्वप्रथमं संस्कृतम् अधिकृत्य भवतः सम्मानः कृतः।

भवता विरचितं कहानीद्वयं प्रसिद्धम् अस्ति- (१) पितुरुपदेशः, (२) कश्चित् कविः।

द्वयोः 'कश्चित् कविः' अधिका प्रसिद्धा। अस्यां कहान्याम् कस्यचित् निर्धनस्य किन्तु आत्मसम्मानभावनया ओतप्रोतस्य कवेः इतिवृत्तम् अस्ति। आत्मसम्मानभावनया राज्याश्रयं अविगण्य्य तं वारं-वारम् अस्वीकृत्य कष्टमयं जीवनं यापयति अयं कविः, परं तु स्वां वृद्धां मातरं तीर्थयात्रां कारयितुमिच्छति। राजमाता इव स्वमातुः दान-पुण्याय संकल्पं कारयति।

अन्ततोगत्वा राजमहिष्याः प्रणयप्रस्तावं अस्वीकारपूर्वकम् अयं कविः राज्ञः आग्रहे राजदरबारे उपस्थितः भूत्वा वस्तुस्थितिं वर्णयति परं तु राजमहिष्याः प्रतिष्ठायाः आघातं न करोति। प्रसन्नः भूत्वा राजा इमं कविं प्रचुरं धनं ददाति।

अस्याः भाषा प्रवाहमयी प्राञ्जला चास्ति। एकम् उदाहरणम् द्रष्ट्व्यम् अस्ति-

'जननि! मैवं वादीः। विवेचय मनाक् स्वातन्त्र्ये यत्सुखं तल्लवोऽपि सततमध्यक्षमुख-प्रेक्षिभिस्तच्चाटुकरणमात्रसमापितकर्तव्यैः तदुदितदुर्वचनशल्य-पूरितकर्णकुहरैरात्मविक्रयिभिर्जनैर्ननाम समासाद्यते स्वप्नेऽपि। भृतिकर्मणि वर्तमानस्य यो महान् क्लेशस्तल्लेशोऽपि यदृच्छोपनतमन्नादिं फलादिं वा यथेच्छं भुञ्जानस्य काले शयानस्य मे नास्ति। मातः सर्वथाहं सुखी। तत्परित्यजतु चिन्तामिमां भवति।'

वस्तुतः इयम् कहानी आत्मसम्मानस्य स्वातन्त्र्यजीवनस्य नैतिकतायाः लोभविहीनतायाः च श्रेष्ठगुणवर्णने सर्वथा सक्षमा अस्ति।

## स्व. विद्याभूषण पं. गणेशरामशर्मा –

राजस्थानस्य कहानीलेखकेषु पण्डितगणेशरामशर्मणः नाम अग्रगण्यम् अस्ति। भवतः जन्म १९०८ ईसवीये वर्षे मार्चमासे २७ तिथौ राजस्थानस्य डूंगरपुरजनपदे अभवत्। भवतः पिता केदारलालशर्मा राजपण्डितः आसीत्। भवतः शिक्षा जयपुरे अभवत्। भवान् पण्डितगिरिराजप्रसादद्विवेदी-पण्डितदुर्गादत्तशर्मा-केदारनाथ शर्मा-भट्टमथुरानाथशास्त्री-आदीनां गुरुवर्याणां सामीप्यं प्राप्य ज्योतिशास्त्रस्य साहित्यशास्त्रस्य अध्ययनं कृतवान्।

भट्टमथुरानाथशास्त्रिणा काव्यरचनायाः प्रेरणा प्राप्ता। तत्र भवतः प्रेरणया एव पण्डितशर्मणा विविधछन्दस्सु रचनाः कृताः।

भवता संस्कृतभाषायां नैककाव्यनिबन्धाः लघुकथाश्च विरचिताः। डूंगरपुरननरेशद्वारा भवतः सम्मानः जातः। भवता १९५० ईसवीवर्षे महारावलस्य लक्ष्मणसिंहस्य रजतजयन्तीसमारोहे अभिनन्दनग्रन्थः सम्पादितः। १९४९ ईसवीय वर्षे झालावाडस्य इण्टरमहाविद्यालये संस्कृतस्य प्राध्यापकः नियुक्तः, ततः १९७७ ईसवीये वर्षे सेवानिवृत्तः।

भवता विरचितेषु काव्येषु-महिषमर्दिनी-स्तुतिः मोहनाभ्युदयम्, सुशीलोद्वाहमङ्गलम्, आशीः कुसुमाञ्जलिः आदयः प्रमुखग्रन्थाः सन्ति। भवतः विंशतिः कथानां संग्रहः 'राजस्थान-संस्कृत-अकादमीतः'-'संस्कृत कथाकुञ्जम्' नाम्ना प्रकाशितः। प्रेम-हास्य-व्यंग्य-करुण-वीरादि-विषय सम्बन्धिता कहानीरचनाः रचिताः पण्डितशर्मणा। तस्य कहानीविधायाः अध्ययनेन स्पष्टं ज्ञायते यत् भाषोपरि तस्य पूर्णाधिकारः विद्यते। एकम् उदाहरणम् प्रस्तुतमत्र- ''युवां द्वावपि स्वस्वविश्वासानुसारं विजयिनौ स्थः। अनेन पुरुषार्थवादिना स्वोद्योगाश्रयात् सुखं लब्धम्। भाग्यवादिना त्वया च भाग्यादेव परिश्रमं विनैव स्वत एव सिद्धं सर्वं सुखं प्राप्तम्। अतोऽधुनाहं निर्णयामि यद् भाग्यवान् भाग्येन तथा च पुरुषार्थवान् पौरुषेण च संसारे स्वमनोरथं साध्नोति। वस्तुतो भाग्यं पुरुषार्थश्च द्वावपि जीवनेऽस्माकमावश्यकौ भवतः।''

## पं. वृद्धिचन्द्रशास्त्री-

भवतः जन्म १९६१ संवत्सरे जयपुरे अभवत्। बाल्यकालः वर्धानगरे व्यतीतः। भवतः प्रारम्भिकी शिक्षा तत्रैव अभवत्। एकादशवर्षस्य अल्पावस्थायां भवतः पितुः देहावसानम् अभवत्। तत्पश्चात् जयपुरे निवर्तनम् अभवत्। अत्रतः १९८४ संवत्सरे शास्त्रि-परीक्षामुत्तीर्य, १९८७ संवत्सरे व्याकरणाचार्यस्य परीक्षायां सफलताम् अधिगतवान्। भवतः गुरुजनेषु पण्डितगिरिधरशर्मा चतुर्वेदी-राजगुरुपण्डितः-चन्द्रदत्त-ओझामहाभागाः पण्डिताः चन्द्रशेखर-प्रश्नवर्याः, विद्यावाचस्पतयः मधुसूदनओझा महोदयाः च प्रमुखाः आसन्।

भवान् १९३१ ईसवीवर्षे चमडिया-संस्कृत-महाविद्यालये, फतेहपुरे प्राचार्यपदे नियुक्तः १९३३ ईसवीये वर्षे जयपुरस्थिते महाराजासंस्कृतमहाविद्यालये व्याकरणाध्यापकरूपेण कार्यारम्भं कृतवान्। अत्रतः १९६१ ईसवीवर्षे धर्मशास्त्रस्य विभागाध्यक्षपदात् सेवानिवृत्तः। १९६४ ईसवीये वर्षे जनवरीमासे २८ तिथौ अमृतलोकं प्राप्तवान्।

अध्यापनादतिरिक्तं बाल्यकालादेव संस्कृत-रचनाकार्ये भवान् संलग्नः आसीत्। भवता उपन्यास-आख्यायिका-लघुकथा-निबन्धलेखनद्वारा संस्कृत-साहित्ये विपुलं योगदानं कृतम्। भवता २१ ग्रन्थाः विरचिताः। भवता विरचितेषु ग्रन्थेषु 'आदर्श-दम्पती' नामक उपन्यासः 'उमा' नाम्नी आख्यायिका च विशेषरूपेण उल्लेखनीये स्तः।

'उमा' इत्याख्यायां कथायां चन्द्रमौलेः उमायाः दाम्पत्यप्रेम्णः वर्णनं कृतमस्ति। अस्याः कथायाः नामकरणं नायिकायाः नामोपरि कृतमस्ति। इयं कथा (कहानी) उत्कृष्टस्य प्रेम्णः परिचायिका अस्ति। नायकनायिकामध्ये नदीतटे प्रतिज्ञा भवति यत् एकस्य मृत्योः अनन्तरं अपरः आत्महत्यां न विधास्यति।

किञ्चित् कालपर्यन्तं एव नायकस्य चन्द्रमौलेः मातुः उमायाः च मृत्युः भवति। चन्द्रमौलिः तां प्रतिज्ञाम् अवलब्य-आत्मघातं न करोति।अस्याः कथायाः भाषा सरला सरसा प्रसादगुणोपेता चास्ति। पतिपत्न्योः मनोभावानां स्वाभाविकाभिव्यक्तिः अस्याः विशेषता अस्ति। अवसरानुसारम् लेखकेन प्रकृत्याः रमणीयचित्रणमपि प्रभावपूर्णरीत्या कृतम्। भाषा-शैल्याः एकम् उदाहरणं द्रष्टव्यम् अस्ति-

'आसीत् शारदी राका। सायाह्न एव भवगतः कुमुदिनीनायकस्य सुविपुलं वर्तुलं च बिम्बं घनीभूतः सुमनसामाह्लादराशिरिव पूर्वक्षितिजे समुदियात्। यथा यथा सूर्यपश्चिमक्षितिजोपरि प्रसृताः कमलिनीनायकस्यारक्ता रश्मयो गगनं पर्यत्यजन् तथा कलापरिपूर्णस्य कलानाथस्य शीतलाः शुभ्राः च कान्तिमन्तः किरणाः समस्तेऽपि विहायसि यथेच्छं प्रसारन्।'

भाषाशैल्या सह अत्र प्रकृत्याः अपि चारुचित्रणं प्रस्तुतम् अस्ति।

## डॉ. पुष्करदत्तशर्मा –

डॉ. पुष्करदत्तशर्मणः जन्म राजस्थानस्य चूरूजनपदे तारानगरे १९२७ ईसवीये वर्षे अप्रैलमासे २१ तिथौ पण्डितस्य जयनारायणशास्त्रिणः गृहे अभवत्। भवतः मातुर्नाम श्रीमती गोपीदेवी आसीत्। भवतः शिक्षा तारानगरे, चूरूनगरे, रामगढ़े, बीकानेरनगरे च अभवत्। भवता १९५५ ईसवीये वर्षे डूंगरमहाविद्यालय-बीकानेरतः स्नातकोत्तरपरीक्षायां प्रथम श्रेण्यां स्थानं प्राप्तम्। १९६२ ईसवीये वर्षे हिन्दीविषये अपि स्नातकोत्तरस्य परीक्षायां सफलतां प्राप्तवान्। १९६९ ईसवीये वर्षे राजस्थानविश्वविद्यालयतः पीएच.डी. इत्युपाधिं प्राप्तवान्।

एतस्मात् पूर्वं डूंगरमहाविद्यालये बीकानेरे संस्कृतप्राध्यापकः नियुक्तः। १९८२ ईसवीये वर्षे जुलाई मासे सेवानिवृत्तिं प्राप्तवान्। सेवानिवृत्तेः पश्चात् एकवर्षपर्यन्तं जैनविश्व-भारती, लाडनू संस्थायां भाषाया अतिरिक्तं आंग्ल-रूसी-फ्रेन्च-आदीनां भाषाणां अपि ज्ञातारूपेण कार्यं कृतम्। भवता विविधविधासु लेखनकार्यं सम्पादितम्। भवता सम्पादितेषु रचितेषु च कार्येषु उल्लेखनीयाः सन्ति-

१. कंटी (हिन्दी उपन्यासः १९७३ ईसवीये वर्षे प्रकाशितः)

२. प्रह्लादमहाकाव्यम् (१९५५-५६ मध्ये प्रकाशितः)

३. संवेदन (हिन्द्याः पञ्चकवितायाः सङ्कलनम्)

४. सम्पादनकार्याणि- भवता महता श्रमेण संस्कृतकाव्यमञ्जरी, संस्कृतपीयूषम्, लघुसिद्धान्तकौमुदी (नवीनभाष्यम्), संस्कृतसाहित्येतिहासः, कृत्यमहार्णवम् (वाचस्पतिमिश्रस्य), स्वरमङ्गलायाः सम्पादनम्, राजस्थानसंस्कृताकादमीतः प्रकाशितस्य 'राजस्थानस्याधुनिकाः संस्कृतकथालेखकाः' इत्यस्या अपि सम्पादनम् कृतम्।

भवता अनेकाः कथाः अपि विरचिताः। तासु 'प्रतिवेशिनी' कथा बहुचर्चिता। इयं कथा सर्वप्रथमं स्वरमङ्गलायां प्रकाशिता, पश्चात् कन्नडभाषायाम् अनूदितो भूत्वा कन्नडभाषायाः पत्रिकायां प्रकाशिता। भवतां शोधनिर्देशने अनेके छात्राः शोधकार्याणि कृतवन्तः।

## डॉ. प्रभाकरशास्त्री –

डॉ. प्रभाकरशास्त्रिणः जन्म जयपुरनगरे १९३९ ईसवीये वर्षे अप्रैलमासे १३ तिथौ अभवत्। भवतः पिता पण्डितः वृद्धिचन्दशास्त्री धर्मशास्त्रस्य उद्भटः विद्वान् आसीत्। स्वपितुः संस्कृतशिक्षां प्राप्तवान् एषः।

भवान् सामवेदपरीक्षायां सफलतां प्राप्तवान्। धर्मशास्त्रे आचार्यपर्यन्तं नैकपरीक्षायां उत्तीर्णतां गतम्।

आधुनिक-शिक्षा-प्रणाल्याम् स्नातकोत्तरपरीक्षाम् उत्तीर्य्य १९६५ ईसवीयेवर्षे पीएच.डी. उपाधिं प्राप्तवान्। तदनन्तरं राजस्थान विश्वविद्यालयत: संस्कृतविषये सर्वप्रथमं डी.-लिट्. इत्युपाधिना विभूषित:।

डॉ. प्रभाकरशास्त्री महोदय: १९६१ ईसवीत: आरभ्य अनेकवर्षपर्यन्तं अध्यापनकार्यं कृतवान्। १९९३ ईसवीयेवर्षे राजस्थानविश्वविद्यालयस्य संस्कृतविभागे आचार्य: नियुक्त:। बहुवर्षपर्यन्तं विभागाध्यक्षपदम् अलंकृ त्य सेवानिवृत्त:। भवान् राजस्थान-संस्कृत-अकादम्या: मानद-निदेशक: अपि आसीत्। २००५ ईसवीय`वर्षे राष्ट्रपतिमहोदयेन सभाजित: पुरस्कृत: अयम् इदानीमपि सारस्वत-साधनायां निरत:।

एतेन संस्कृतजगति बहूनि कार्याणि कृतानि। नैकवर्षपर्यन्तं भवता-'विश्वम्भरा' इत्यस्या: पत्रिकाया: सम्पादनं कृतम्। भवत: शोधलेखा: विविधासु पत्रिकासु प्रकाशिता: सन्ति। भवता सम्पादितासु कृतिषु-याज्ञवल्क्यस्मृति: (आचाराध्यायपर्यन्तम्) संस्कृतगद्यप्रभा, इन्दुमतीस्वयंवर: मध्यमव्यायोग: प्रतिज्ञायौगन्धरायणम्, सौन्दर्यलहरीटीका, आद्या: प्रमुखा: सन्ति।

भवता अनेकानि (आकाशवाणी) रूपकाणि, लिखितानि अनेका: कथा: च लिखिता:। भवता विरचितासु कथासु 'जीवन-ज्योति:' 'आत्मवेदना' च प्रमुखे स्त:। जीवन-ज्योति: 'स्वरमङ्गला' पत्रिकायां प्रकाशिता। 'आत्मवेदना' इति कथा 'राजस्थानस्याधुनिका: संस्कृतकथालेखका:' नामकसंकलनग्रन्थे प्रकाशिता अस्ति।

भवत: शोधनिर्देशने अनेके विद्यार्थिन: शोधकार्यं कृतवन्त:। अन्येषु कथाकारेषु डॉ. नन्दकिशोरगौतम:, श्रीगिरिराजशास्त्री, श्रीदुर्गादत्त झा मैथिल:, पण्डितदीनानाथत्रिवेदी, डॉ. नारायणशास्त्री कांकर: आदय: प्रमुखा: सन्ति।

## आधुनिकरूपककारा:

महाकाव्यं, कथासाहित्यं, गीतिकाव्यम्-इत्यादीनां विधानाम् इव नाट्यसाहित्यलेखनम् अपि विद्वद्भि: प्राचीनकालादेव बहुमान्यम् आसीत्। आधुनिकयुगे अपि राजस्थाने संस्कृतसाहित्ये रूपकाणां नैका: रचना: प्राप्यन्ते। रूपकरचनायां प्रवृत्तानां रूपककाराणां परिचय: संक्षेपेण एवम् प्रस्तुत: अस्ति-

**(१) श्रीगोविन्द्रप्रसादशास्त्री-** श्रीगोविन्दप्रसादशास्त्री रूपकसाहित्ये उल्लेखनीय: अस्ति। शास्त्रिणा समसामयिकविषयेषु रूपकाणि रचितानि यानि संस्कृतस्य विविधासु पत्रिकासु प्रकाशितानि। भवत: प्रमुखानि रूपकाणि सन्ति- 'बालशाकुन्तलम्' श्रेष्ठशिष्योदाहरणम्, भारतविजयम्, पाकगर्वभञ्जनम्, कृष्णसुदामानाटकम्, हरिश्चन्द्रनाटकम् इत्यादीनि।

**(२) श्रीविद्याधरशास्त्री-** महाकाव्य-खण्डकाव्य-कथादीनां लेखने अग्रगण्य: श्री विद्याधरशास्त्री महोदय: रूपकसाहित्यविरचने अपि तथैव निपुण:। भवता लिखितानि रूपकाणि

'विद्याधरग्रन्थावल्याम्' सुरक्षितानि सन्ति। भवता विरचितेषु रूपकेषु-दुर्बलबलम्, पूर्णानन्दम्, कलिपलायनम् आदयः रूपकग्रन्थाः प्रमुखाः सन्ति।

**(३) डॉ. नारायणशास्त्री काङ्करः-** डॉ. नारायणशास्त्री काङ्करः पण्डितस्य नवलकिशोरशास्त्रिणः योग्यपुत्रः अस्ति। स्वपिता इव साहित्यसर्जने भवतः विशेषरुचिः विद्यते। भवता संस्कृतभाषायां अनेकानि रूपकाणि रचितानि सन्ति। कतिपयानि प्रमुखानि एवम् सन्ति-

'कर्तव्यपरायणता, स्वातन्त्र्य-यज्ञाहुतिः, कुणालस्य कुलीनता, धनिक-धूर्तता, सुहृत्समागमः स्वामिभक्ता पन्ना धात्री, प्रतिभाचमत्कारः, उदारमना-भामाशाहः, गुरुदक्षिणा, प्रेम-परीक्षा, स्वदेश-प्रेम, भक्तराजचन्द्रहासः, अशोकस्य पराजयः, बन्दी चन्द्रगुप्तः, प्रत्युत्पन्नमतिः नापितः, ताडन-भयम्, पशुकल्याणम् इत्यादीनि।'

श्रीकाङ्करमहोदयः संस्कृतस्य आशुकविः अपि अस्ति। भवतः भाषा-शैली सरला, सरसा, रमणीया चास्ति। भाषायां स्वाभाविकः प्रवाह विद्यते।

**(४) डॉ. हरिरामाचार्यः -** डॉ. आचार्यः संस्कृतस्य प्रतिष्ठित-साहित्यकारः अस्ति। आकाशवाण्या दूरदर्शनेन च भवतः ख्यातिः दिग्दिगन्ते व्याप्ता। दूरदर्शने 'दायरे' इति 'सीरियलमाध्यमेन' भवान् बहुचर्चितः।

भवान् एकः सुमधुरः आशुकविः उत्कृष्टः नाटककारः, एकांकीलेखकः अपि अस्ति। भवता विरचितेषु रूपकेषु-पूर्वशाकुन्तलम् गङ्गालहरी, नहि भोजसमो नृपः, आषाढस्य प्रथमदिवसे, सत्यमेव जयते, वेतालकथा, नेत्रदानम्, कनिष्ठिकाधिष्ठित-कालिदासः, इत्यादीनि रूपकाणि प्रसिद्धानि सन्ति।

कवितारचनाकार्यहेतोः भवान् मीरापुरस्कारेण पुरस्कृतः अस्ति। राष्ट्रपतिद्वारा अस्मिन् वर्षे (२००५ ईसवी वर्षे) सम्मानितः।

राजस्थानस्य अन्येषु रूपककारेषु मध्ये देवर्षिकलानाथशास्त्री महाभागः राष्ट्रपतिपुरस्कारेण सम्मानितः। 'साहित्यवल्लरी' नामाख्यकृतिरचनया एषः संस्कृतसाहित्यस्य सम्माननीयं पुरस्कारं प्राप्तवान्। महाभिनिष्क्रमणम्, कर्मक्षेत्रे, चित्तौड़सिंहः, प्रतापसिंहः, प्रतापसिंहीयम् ख्यातकृतयः सन्ति। डॉ. प्रभाकरशास्त्री (जगद्गुरु श्रीशङ्कराचार्यः, महाकविर्माघः, बिल्हणचरितम्) डॉ. देवशर्मा वेदालङ्कारः (अभिमन्यु-शौर्यम्, शरण्यः शिवि, दूतवाक्यम्, राज्याभिषेकः, सुरक्षा परिषदः अधिवेशनम्) डॉ. शिवसागर त्रिपाठी (प्राणाहुतिः), श्री पद्मशास्त्री (बांग्लादेश-विजयः, लोकतन्त्रविजयः) श्रीमेवराम कटारा (समर्पणम्, पथिकः, निष्क्रियः) डॉ. वैकुण्ठशास्त्री (हमीरोत्सर्गनाटकम्-इत्यादयः विद्वांसः प्रतिष्ठिताः सन्ति।

एतदतिरिक्तं वेद-ज्योतिष-दर्शनादिविधासु लेखनेऽपि कतिपये मूर्धन्याः विद्वांसः सन्ति येषां वर्णनं विना अस्मिन् विषये पूर्णता न सम्भवति। अतएव तेषां संक्षिप्तपरिचयः एवम् प्रस्तुतः अस्ति-

**(क) पं. मधुसूदनओझा** – भवतः जन्म बिहारराज्यस्य मुजफ्फरपुरजनपदस्य 'गाढा' नामके ग्रामे पण्डितवैद्यनाथओझागृहे अभवत्। प्रारम्भिकी शिक्षा तत्रैव अभवत्। उच्चशिक्षा वाराणस्याम् अभवत्। भवतः कर्मस्थली राजस्थानम् अस्ति। भवतः वैदुष्येण प्रभावितो भूत्वा जयपुरनरेशद्वारा भवान् महाराजा संस्कृतमहाविद्यालये दर्शनविषयस्य प्राध्यापकपदे नियुक्तः। तत्कालीनशासकेन माधवसिंहेन स्वपोथीखाना इत्यस्य पुस्तकालयस्य प्रबन्धकः अपि नियुक्तः। भवता 'मौज मन्दिरः' इति शासकीयधर्मसभायाः अध्यक्षपदं सुशोभितम्।

भवता अनेके योग्यशिष्या निर्मिताः, येषु-महामहोपाध्यायाः पं. गिरिधरशर्मा चतुर्वेदाः, आर्यसूर्यनारायणशास्त्रिणः, पण्डितमोतीलालशास्त्रिणः, भट्टमथुरा-नाथशास्त्रिणः, स्वामीसुरजनदासाः, पण्डिताः नवलकिशोरकाङ्कराश्च उल्लेखनीयाः सन्ति।

भवान् वैदिकवाङ्मयस्य भारतीयधर्मदर्शनयोः च अद्वितीयः विद्वान् आसीत् भवता 'वैदिककोषः' नामकः ग्रन्थः निर्मितः यत्र वैदिकशब्दाः सङ्कलिताः सन्ति।

भवता विरचितेषु ग्रन्थेषु-इन्द्रविजयः, कादम्बिनी, अहोरात्रवादः, महर्षिकुलवैभवम्, आशोचपञ्जिका, पथ्यास्वस्तिः, श्रीमद्भगवद्गीतायाः विज्ञानभाष्यम्-आदयः ग्रन्थाः महत्त्वपूर्णाः सन्ति, यैः भवतः यशांसि इदानीमपि दिग्दिगन्ते प्रसारितानि सन्ति।

**(ख) महामहोपाध्यायः पं. दुर्गाप्रसादद्विवेदी** – भवान् ज्योतिषशास्त्रस्य प्रख्यातः विद्वान् अस्ति। भवतः पिता जयपुरराज्ञा सवाई रामसिंहेन जयपुरे ससम्मानेन आमंत्रितः। पण्डितदुर्गाप्रसादद्विवेदिनः जन्म १९२० संवत्सरे श्रावणमासस्य कृष्णपक्षे चतुर्दश्यां तिथौ सरयूप्रसाद द्विवेदी गृहे अभवत्।

भवतः प्रारम्भिकी शिक्षा स्वपितुः समीपे जयपुरे एव अभवत्। ज्योतिषशास्त्रं अध्येतुं भवान् वाराणसीं गत्वा निष्ठया अध्ययनं कृतवान् वैदुष्यं च प्राप्तवान्। वाराणसीतः निवर्त्य महाराजा संस्कृतमहाविद्यालये ज्योतिषविषयस्य प्राध्यापकः नियुक्तः पश्चात् विभागाध्यक्षः अभवत्। १९२५ ईसवीये वर्षे इतः सेवानिवृत्तः। स्वसेवानिवृत्तेः पश्चात् १९३२ ईसवीयवर्षे भवता 'सरस्वतीपीठ' नाम्ना प्राच्यशोधसंस्थानम् स्थापितम्।

भवता भास्कराचार्यस्य 'सिद्धान्त-शिरोमणौ' गणिताध्यायं आधारीकृत्य छात्राणां कृते ग्रहगणित-सिद्धान्तानां विवेचनम् कृतम्।

भवता निर्मितेषु ग्रन्थेषु-देवराजचरितम् साहित्यदर्पणमस्य टीका, चातुर्वर्ण्यशिक्षा, उपपत्तीन्दुशेखरः, दशकण्ठवधम्- आदयः प्रमुखा सन्ति।

**(ग) पं. दुर्गाप्रसादशर्मा** - पण्डित दुर्गाप्रसादशर्मणः जन्म काश्मीरनरेशस्य राजसभायाः पण्डित-ब्रजलालशर्मणः पुत्ररूपेण अभवत्। भवता प्रारम्भिकी शिक्षा पण्डितदेवकृष्णसकाशे प्राप्ता। राजकुमारेण प्रतापसिंहेन सह आंग्लभाषायां कुशलताधिगता। १६ वर्षस्य अल्पावस्थायां स्वपितुः देहावसानात् खिन्नः भूत्वा भवान् जयपुरे आगतः।

जयपुरागमनानन्तरं भवता उत्तरखण्डस्य यात्रा कृता। यात्रामध्ये नैकाः पाण्डुलिपयः अवलोकिताः, तासाम् सङ्कलनं सम्पादनं च कृतम्। भवता सम्पादितेषु ग्रन्थेषु-मुरारिलिखितं 'अनर्घराघवम्' शेषकृष्णरचितं 'पारिजातहरणचम्पूः', बिल्हणविरचितं 'कर्णसुन्दरी' तथा च निर्णयसागरयन्त्रालयतः प्रकाशितेषु सम्पादितेषु ग्रन्थेषु-सुभाषितावलिः कथासरित्सागरः, कामसूत्रम् इत्यादयः विशेषरूपेण उल्लेखनीयाः सन्ति।

भवतः वैदुष्यमभिलक्ष्य भारतसर्वकारेण १९०७ ईसवीये वर्षे 'महामहोपाध्यायः' इत्युपाधिना विभूषयितुं निर्णीतम्, परं तु एतस्मात् पूर्वमेव भवतः जयपुरे निधनं जातम्। अतएव मरणोपरान्तं इयं उपाधिः सर्वकारेण प्रदत्ता भवन्तम्।

उपर्युक्तेभ्यः विद्वद्भ्यः अतिरिक्तं राजस्थाने विदुषां एका दीर्घा-शृङ्खला अस्ति। अस्याम् शृङ्खलायां-जयपुरीयः श्रीहरिनारायण शास्त्री (रामचन्द्रस्तवः, ललितसहस्रनाम-काव्यम्, संजीवनी-साम्राज्यम्), जोधपुरीयः आशुकविः पण्डितनित्यानन्द शास्त्री (मारुति-स्वतः, रामचरिताब्धिरत्नम्, पुष्पचरितम्), झालावाड़ीय पण्डितः गिरिधर शर्मा नवरत्नः (श्रीबालकृष्णस्तवः, श्रीगङ्गास्तवः जापानविजयः, अभेदरसः, काकरत्नम्) उदयपुरीयः पण्डित गिरिधरलालशास्त्री (भागवतरहस्यम्, श्रीकृष्णचरितम्, मेदपाटेतिहासः) आदयः विद्वांसः अग्रगण्याः प्रातः स्मरणीयाः च सन्ति।

उपर्युक्तविवेचनैः इदं ज्ञायते यत् वर्तमानकाले अपि राजस्थानप्रान्ते संस्कृतवाङ्मये विविधविधासु लेखनकार्यम् अनवरतरूपेण गतिमानम् अस्ति।

**महत्त्वपूर्णबिन्दवः**

१. संस्कृतसाहित्यस्य भेदद्वयमस्ति-वैदिकं लौकिकञ्च।

२. ऋग्वेदः न केवलं संस्कृतसाहित्यस्य अपितु विश्वसाहित्यस्य प्राचीनतमग्रन्थः अस्ति।

३. प्रधानतया वेदः द्विधा विभक्तः अस्ति-मन्त्ररूपः ब्राह्मणरूपश्च

४. प्राचीनभारतीयविद्वद्भिः स्वीकृतं यत् वेदाः अपौरुषेयाः सन्ति।

५. वैदिकसाहित्ये-संहिता-ब्राह्मण-आरण्यक-उपनिषद्-इत्यादीनि सन्ति।

६. लौकिकसाहित्यं द्विधा विभक्तमस्ति-दृश्यं श्रव्यं च।

७. दृश्यं नाट्यसाहित्यम्।

८. श्रव्यसाहित्यमपि त्रिधा-विभक्तम् अस्ति- पद्यं, गद्यं चम्पूश्च।

९. पद्यशास्त्रमिव नाट्यशास्त्रं महत्त्वपूर्णमस्तिः।

१०. तेषु बहुमूल्यजीवनोपयोगी शिक्षा प्रदत्ता।

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. ईश्वरविलासस्य रचनाकारः अस्ति–

(क) श्रीसीतारामभट्ट पर्वणीकरः (ख) श्रीकृष्णरामभट्टः

(ग) श्रीसूर्यनारायणशास्त्री (घ) पण्डितविद्याधरशास्त्री ( )

२. 'कृष्णदूतम्' नामकं काव्यस्य प्रणेता अस्ति–

(क) श्रीसूर्यनारायणशास्त्री (ख) पण्डितः विद्याधरशास्त्री

(ग) श्रीपद्मदत्त ओझा (घ) गोस्वामी हरिरायः ( )

३. 'लेनिनामृतम्' इत्यस्य महाकाव्यस्य रचनाकारः अस्ति

(क) श्रीपद्मदत्तओझा (ख) श्रीगोस्वामीहरिरायः

(ग) श्रीसूर्यनारायणशास्त्री (घ) देवर्षिकलानाथशास्त्री ( )

४. 'महारथी' इत्यस्य काव्यस्य रचनाकारः अस्ति–

(क) डॉ. रसिकबिहारी जोशी (ख) पण्डितगुलाबचन्द्र चूलेट

(ग) भट्टमथुरानाथशास्त्री (घ) पण्डितविद्याधरशास्त्री ( )

५. 'चन्द्रमहीपतिः' उपन्यासः लिखितः अस्ति–

(क) श्रीनिवासाचार्येण (ख) पण्डितनवकिशोरशास्त्रिणा

(ग) श्रीनारायणशास्त्रिणा (घ) डॉ. प्रभाकरशास्त्रिणा ( )

६. भट्टमथुरानाथशास्त्रिणा प्रणीतः उपन्यासः अस्ति–

(क) चन्द्रमहीपतिः (ख) यात्राविलासमृ

(ग) आदर्शरमणी (घ) जीवनस्य पृष्ठद्वयम् ( )

७. 'महाभिनिष्क्रमणम्' नाट्यरचना अस्ति–

(क) देवर्षेः कलानाथशास्त्रिणः (ख) पं. देवशर्मा वेदालङ्कारस्य

(ग) डॉ. शिवसागरत्रिपाठिनः (घ) श्रीपद्मशास्त्रिणः ( )

८. 'जगद्गुरु श्रीशङ्कराचार्यः' विरचितम् अस्ति–

(क) श्रीभट्टमथुरानाथशास्त्रिणा (ख) देवर्षिकलानाथशास्त्रिणा

(ग) श्री प्रभाकरशास्त्रिणा (घ) डॉ. बैकुण्ठशास्त्रिणा ( )

९. 'इन्द्रविजयम्' इत्यस्य प्रसिद्धः वैदिक विद्वान् अस्ति–

(क) पं. दुर्गाप्रसादद्विवेदी (ख) पं. मधुसूदन ओझा

(ग) पं. दुर्गाप्रसाद शर्मा (घ) पं. वृद्धिचन्दशास्त्री ( )

#### उत्तरमाला – वस्तुनिष्ठप्रश्नाः

१.क २.क ३.क ४.ख ५.क ६.ग ७.क ८.ग ९.ख

❀ ❀ ❀

# चतुर्थः खण्डः
## व्याकरणम्

व्याकरणसम्प्रदाये वैयाकरणानामेका सुदीर्घा परम्परा वर्तते। तत्र पाणिनिः कात्यायनः पतञ्जलिः प्रमुखाः आचार्याः सन्ति अतएव परम्परायामेते 'मुनित्रय' नाम्ना प्रथिताः सन्ति। एषु पाणिनि : सूत्रकारः, कात्यायनः वार्तिककारः, पतञ्जलिश्च भाष्यकारः अस्ति। सूत्रस्य परिभाषा विषये प्रसिद्धोऽयं श्लोकः –

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।**
**अस्तोभमनवद्यं च, सूत्रं सूत्रविदो विदुः।।**

भगवतः शिवस्य प्रसादात् पाणिनिः यानि चतुर्दशसूत्राणि अधिगतवान् तानि माहेश्वरसूत्रनाम्ना प्रसिद्धानि सन्ति। तानि च – १. अइउण् २. ऋलृक् ३. एओङ् ४. ऐऔच् ५. हयवरट् ६. लण् ७. ञमङणनम् ८. झभञ् ९. घढधष् १०. जबगडदश् ११. खफछठथचटतव् १२. कपय् १३. शषसर् १४. हल्।

इमानि सूत्राणि एव अष्टाध्यायी नाम्ना प्रसिद्धस्य पाणिनीयव्याकरणस्य आधारभूतानि सन्ति। एषां सूत्राणामन्ते विद्यमानानां ण् क् ङ् च् ...... इत्यादीनां वर्णानां इत्संज्ञया लोपः भवति। एतेषां लोपस्य मुख्यं प्रयोजनमस्ति- प्रत्याहारसिद्धिः। प्रत्याहारशब्दस्य अर्थः अस्ति – वर्णानां संक्षिप्तीकरणम्। प्रत्याहाराः ४४ भवन्ति ते च –

| | | |
|---|---|---|
| १. | अण् | अ, इ, उ |
| २. | अक् | अ, इ, उ, ऋ, लृ |
| ३. | इक् | इ, उ, ऋ, लृ |
| ४. | उक् | उ, ऋ, लृ |
| ५. | एङ् | ए, ओ |
| ६. | अच् | सर्वे स्वराः |
| ७. | इच् | इ, उ, ऋ, लृ, ए, ओ, ऐ, औ |
| ८. | एच् | ए, ओ, ऐ, औ |
| ९. | ऐच् | ऐ, औ |
| १०. | अट् | स्वराः, ह, अन्तःस्थ (य् व् र् ल्) |
| ११. | अण् | स्वराः, ह, अन्तःस्थ (य् व् र् ल्) |
| १२. | इण् | इ, उ, ऋ, लृ, ए, ओ, ऐ, औ, ह, य, व, र, ल |
| १३. | यण् | य् व् र् ल् |
| १४. | अम् | वर्गपञ्चमाः |
| १५. | यम् | अन्तःस्थ, वर्गपञ्चमाः |

| | | |
|---|---|---|
| १६. | ञम् | वर्गपञ्चमाः |
| १७. | ङम् | ङ्, ण्, न् |
| १८. | यञ् | अन्तःस्था, वर्गपञ्चमाः |
| १९. | झष् | झ् भ् घ् ढ् ध् |
| २०. | भष् | भ् घ् ढ् ध् |
| २१. | अश् | स्वराः, ह, अन्तःस्थाः, वर्गाणां तृतीय-चतुर्थ-पञ्चमाः |
| २२. | हश् | हः, अन्तःस्थाः, वर्गाणां तृतीय-चतुर्थ-पञ्चमाः |
| २३. | वश् | व् र् ल् , वर्गाणां तृतीय-चतुर्थ-पञ्चमाः |
| २४. | जश् | ज् ब् ग् ड् द् |
| २५. | झश् | वर्गाणां तृतीयचतुर्थौ |
| २६. | बश् | ब् ग् ड् द् |
| २७. | छव् | छ् ठ् थ् च् ट् त् |
| २८. | यय् | अन्तःस्थाः, सर्वे वर्गाः |
| २९. | मय् | म्, ङ्, ण्, न्, झ्, भ् ,घ्, ढ्, ध्,ज्, ब्, ग्, ड्, द्, ख्, फ् छ् ठ् थ्,च् ,ट्, त् ,क्, प् |
| ३०. | झय् | वर्गाणां प्रथमद्वितीयतृतीयचतुर्थाः |
| ३१. | खय् | वर्गाणां प्रथमद्वितीयौ |
| ३२. | चय् | वर्गाणां प्रथमवर्णाः |
| ३३. | यर् | अन्तःस्थाः, सर्वे वर्गाः, श्, ष्, स् |
| ३४. | झर् | वर्गाणां प्रथमद्वितीयतृतीयचतुर्थाः |
| ३५. | खर् | वर्गाणां प्रथमद्वितीयौ, श्, ष्, स् |
| ३६. | चर् | वर्गानां प्रथमः, श्, ष्, स् |
| ३७. | शर् | श्, ष्, स् |
| ३८. | अल् | स्वराः व्यञ्जनानि च |
| ३९. | हल् | व्यञ्जनानि |
| ४०. | वल् | य् वर्णं विहाय अन्यानि सर्वाणि व्यञ्जनानि |
| ४१. | रल् | य्, व् विहाय अन्यानि सर्वाणि व्यञ्जनानि |
| ४२. | झल् | वर्गाणां प्रथमद्वितीयतृतीयचतुर्थाः, श्, ष्, स्, ह |
| ४३. | शल् | श्, ष्, स्, ह |
| ४४. | रँ | र्, ल् |

एतन्निर्देशः सन्धिप्रकरणावबोधाय आवश्यकेति धिया अस्य अत्र व्यवस्थापनं कृतम्। एवमेव वाक्यरचनायां वाग्व्यवहारे च कारकस्य महत्त्वपूर्णं योगदानं भवति। सन्धिज्ञानानन्तरमेव वाक्यनिर्मितिः भवतीति सन्ध्यनन्तरं समासप्रकरणं तदनन्तरं कारकप्रकरणप्रतिपादितमस्ति।

## ( क ) सन्धिप्रकरणम्–

**सन्धिशब्दस्यव्युत्पत्तिः** – सम् उपसर्गपूर्वकात् डुधाञ् (धा) धातोः ''उपसर्गे धोः किः'' इति सूत्रेण कि प्रत्यये कृते सन्धिरिति शब्दो निष्पद्यते।

**सन्धिशब्दस्य परिभाषा**– वर्णसन्धानं सन्धिः अर्थात् द्वयोः वर्णयोः परस्परं यत् सन्धानं मेलनं वा भवति तत्सन्धिरिति कथ्यते।

**पाणिनीयपरिभाषा**– ''परः सन्निकर्षः संहिता'' अर्थात् वर्णानाम् अत्यन्तनिकटता संहिता'' इति कथ्यते। यथा– सुधी+उपास्यः इत्यत्र ईकार–उकारवर्णयोः अत्यन्तनिकटता अस्ति। एतादृशी वर्णनिकटता एव संस्कृतव्याकरणे संहिता इति कथ्यते। संहितायाः विषये एव सन्धिकार्ये सति सुध्युपास्यः इति शब्दसिद्धिर्जायते।

**सन्धिभेदा**– संस्कृतव्याकरणेः त्रयो सन्धिभेदाः। ते इत्थं सन्ति–

**( १ ) अच् सन्धिः ( स्वरसन्धिः )** – द्वयोः स्वरयोः मध्ये यत् मेलनं सन्धानं वा जायते, तत् कथ्यते स्वरसन्धिः अर्थात् अच्सन्धिः इति।

**( २ ) हल् सन्धिः ( व्यंजनसन्धिः )** – द्वयोः व्यंजनयोः मध्ये यत् मेलनं सन्धानं परिवर्तनं वा जायते, तत् कथ्यते व्यंजनसन्धिः अर्थात् हल्सन्धिः इति।

**( ३ ) विसर्गसन्धिः** – विसर्गस्य कारणेन यत्र सन्धानं मेलनंपरिवर्तनं वा भवति, तत् कथ्यते विसर्गसन्धिः इति।

सन्धियुक्तशब्दानां पुनः विच्छेदनं पृथक्करणं वा कथ्यते सन्धिविच्छेदः इति। स्वरसन्धेः अथवा अच् सन्धेः अनेके प्रकाराः भवन्ति। तेषु महत्त्वपूर्णाः इत्थं भवन्ति –

### ( १ ) अच् सन्धिः

**१. 'इकोयणचि' ( पा. सू. ६. १. ७५ )** – इत्यनेन सूत्रेण संहितायाः विषये अचि परे सति पूर्ववर्तिनः इकः स्थाने स्याद् यण्। माहेश्वरसूत्रानुरूपं इ/ई, उ/ऊ, ऋ/ॠ, लृ एते वर्णाः इक् वर्णाः इति कथ्यन्ते। एवमेव य, व, र, ल एते वर्णाः यण् वर्णाः इति कथ्यन्ते। उपरिलिखितानाम् इक्वर्णानां स्थाने अधोलिखिताः यण् वर्णाः यत्र क्रमशः भवन्ति, तत्र जायते यण् सन्धिः। क्रमशः 'तस्मिन्निति निर्दिष्टे पूर्वस्य', 'स्थानेऽन्तरतमः', 'अनचि च', 'झलां जश् झशि', 'संयोगान्तस्य लोपः', 'अलोऽन्त्यस्य', 'यणः प्रतिषेधो वाच्यः' इति एभिः सूत्रैः उदाहरणानि निर्मितानि भवन्ति–

| | | | | |
|---|---|---|---|---|
| मधु | + | अरि | = | मद्ध्वरिः, मध्वरिः |
| सुधी | + | उपास्य | = | सुद्ध्युपास्यः, सुध्युपास्यः |
| लृ | + | आकृतिः | = | लाकृतिः |
| धातृ | + | अंशः | = | धात्त्रंशः, धात्रंशः |

## २. एचोऽयवायावः ( पा. सू. ६. १. ७५ ) –

एचः क्रमात् अय् अव् आय् आव् एते स्युः अचि। अर्थात् एच् (ए ओ ऐ औ) वर्णस्य पश्चात् अच् वर्णः दृश्यते तदा एच् इत्यस्य स्थाने क्रमशः अय् अव् आय् आव् आदेशाः भवन्ति। माहेश्वरसूत्रानुरूपं क्रमशः ए, ओ, ऐ, औ इति वर्णाः 'एच्' इति कथ्यन्ते। उदाहरणपुष्ट्यर्थम् अग्रिमसूत्रप्रवृत्तिः भवति–

## ३. यथासंख्यमनुदेशः समानाम् ( पा. सू. १. ३. १० ) –

समसम्बन्धी विधिः यथासंख्यं स्यात्। यत्र स्थानिनः आदेशस्य च संख्या समाना भवति तत्र कार्यविधानं संख्यानुसारमेव भवति। उदाहरणम् –

| | | | | | |
|---|---|---|---|---|---|
| हरये | = | हरे | + | ए | (हर् अय् ए) |
| विष्णवे | = | विष्णो | + | ए | (विष्ण् अव् ए) |
| नायकः | = | नै | + | अकः | (न् आय् अकः) |
| पावकः | = | पौ | + | अकः | (प् आव् अकः) |

## ४. वान्तो यि प्रत्यये ( पा. सू. ६. १. ७६ ) –

अयादिसन्धिसूत्रानुसारेण यकारादौ प्रत्यये परे ओदौतोः अव आव एतौ स्तः अर्थात् ओकारस्य-औकारयो स्थाने क्रमशः अव् आव् आदेशौ भवतः यदि कश्चित् यकारादिः प्रत्ययः पश्चात् भवति। यथा –

| | | | | | |
|---|---|---|---|---|---|
| गव्यम् | = | गो | + | यम् | (ग् अव् यम्) |
| नाव्यम् | = | नौ | + | यम् | (न् आव् यम्) |

## ५. अध्वपरिमाणे च ( वार्तिक ) –

मार्गस्य परिमाणे गम्यमाने (गम्यमाने) सति ओकारस्य स्थाने वान्तः (अव्) आदेशः भवति। यथा –

| | | | | | |
|---|---|---|---|---|---|
| गव्यूतिः | = | गो | + | यूतिः | (ग् अव् यूतिः) |

गव्यूतिः (क्रोशद्वयम्) इत्यत्र मार्गपरिणामस्य ज्ञानं भवति अतएव 'गो' इत्यस्य स्थाने अवादेशः।

## ६. अदेङ् गुणः ( पा. सू. १. १. २ )–

अत् एङ् च गुणसंज्ञः स्यात्। अर्थात् अ, ए, ओ एते वर्णाः गुणसंज्ञकाः भवन्ति।

## ७. तपरस्तत्कालस्य ( पा. सू. १. १. ६९ ) –

तः परो यस्मात् स चतात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्। अर्थात् यस्मात् वर्णात् परः तकारः अस्ति तथा च तकारात् परः यः वर्णः अस्ति सः स्वकाल (मात्रा) सदृशकालस्य बोधकः भवति। यथा– अदेङ् गुणः इत्यत्र अ ए ओ इति वर्णत्रयम् अस्ति अत्र च –

अ.......षण्णां ह्रस्व-अकाराणां बोधकः

ए.......षण्णां ह्रस्व-अकाराणां बोधकः

ओ.......षण्णां ह्रस्व-अकाराणां बोधकः

## ८. आद् गुणः ( पा. सू. ६. १. ८४ ) –

अवर्णात् अचि परे पूर्वपरयोरेको गुणादेशः स्यात्।

अर्थात् अकारस्य पश्चात् अच् (स्वर:) वर्ण: भवति तदा पूर्वपरयो: द्वयो: वर्णयो: स्थाने एक: गुण: (अ, ए, ओ) आदेश: भवति। यथा–

| | | | | | |
|---|---|---|---|---|---|
| उप | + | इन्द्र: | = | उपेन्द्र: | (अ + इ = ए) |
| महा | + | इन्द्र: | = | महेन्द्र: | (आ + इ = ए) |
| पर | + | उपकार: | = | परोपकार: | (अ + उ = ओ) |
| हित | + | उपदेश: | = | हितोपदेश: | (अ + उ = ओ) |
| गङ्गा | + | उदकम् | = | गङ्गोदकम् | (अ + उ = ओ) |
| गगन | + | ऊर्ध्वम् | = | गगनोर्ध्वम् | (अ + ऊ = ओ) |
| महा | + | ऊर्णम् | = | महोर्णम् | (अ + ऊ = ओ) |

### ९. उपदेशेऽजनुनासिक इत् (पा. सू. १. ३. २) –

उपदेशे अनुनासिक: अच् इत्संज्ञ: स्यात्। प्रतिज्ञानुनासिक्या: पाणिनीया:। लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयो: संज्ञा। पूर्वकाले अनुनासिकस्वरस्य ज्ञानं ( ँ ) चिह्नेन भवति स्म। सम्प्रति एवंविध: पाठ: न उपलभ्यते। फलत: इयं व्यवस्था अस्ति यत् स्वरवर्णानां इत्संज्ञां कर्तुं तेषां अनुनासिकरूपेण प्रतिज्ञा भवति। लण् सूत्रे य: लकारस्थ: अकार: अस्ति तस्य इत्संज्ञायां **'र'** प्रत्याहारसिद्धि: भवति। एतेन **'र'** इत्यनेन 'र् ल्' इत्यनयो: ग्रहणं भवति।

### १०. उरण् रपर: (पा. सू. १. १. ५०) –

ऋ इति त्रिंशत: संज्ञा इत्युक्तम्, तत्स्थाने योऽण् स रपर: सन्नेव प्रवर्तते। ऋवर्ण: अष्टादश लृवर्णश्च द्वादश। ऋ लृ इत्यनयो: सवर्णसंज्ञा भवति अतएव द्वयो स्वरवर्णयो: संख्यामेलनेन त्रिंशत् संख्या भवति। इत्थं **'ऋ'** इत्यस्य वर्णस्य स्थाने य: अण् (अ इ उ) स रपर एव भवति। एवमेव **'लृ'** इत्यस्य वर्णस्य स्थाने य: अण् स लपर: भवति। यथा– अर् अल् आर् आल् इर् इल् उल्। उदाहरणम् –

**कृष्ण + ऋद्धि: = कृष्णर्द्धि: –** अत्र णकारे अकार: तदनन्तरं च ऋकार:। अत: **'आद् गुण:'** इति सूत्रेण अकारऋकारयो: स्थाने **'अ'** गुण: **उरण् रपर:** इत्यनेन रपर: (अर्) **कृष्णर्द्धि:** रूपं सिद्धयति।

**तव + लृकार: = तवल्कार:** अत्र वकारे अकार: तदनन्तरं च लृकार:। अत: **'आद् गुण:'** इति सूत्रेण अकारलृकारयो: स्थाने **'अ'** गुण: **उरण् रपर:** इत्यनेन लपर: (अल्) **तवल्कार:** रूपं सिद्धयति।

| | | | | | | |
|---|---|---|---|---|---|---|
| एवमेव – | देव | + | ऋषि: | = | देवर्षि: | (अ + ऋ = अर्) |
| | महा | + | ऋषि: | = | महर्षि: | (आ + ऋ = अर्) |

### ११. वृद्धिरादैच् (पा. सू. १. १. १) –

आत् ऐच्च वृद्धिसंज्ञ: स्यात्। पाणिनीयव्याकरणस्य इदं सर्वप्रथमं सूत्रम्। सूत्रानुसारेण **'आ ऐ औ'** इति एषां त्रयाणां स्वरवर्णानां वृद्धिसंज्ञा भवति।

### १२. वृद्धिरेचि ( पा. सू. ६. १. ८५ ) –

आतः एचि परे वृद्धिरेकादेशः स्यात्। संहिताविषये अ/आ वर्णतः परे 'एच्' (ए, ओ, ऐ औ) विद्यमाने पूर्वपरयोः स्थाने वृद्धिरेकादेशः भवति। उदाहरणानि –

| | | | | |
|---|---|---|---|---|
| कृष्ण | + | एकत्वम् | = | कृष्णैकत्वम् |
| देव | + | ऐश्वर्यम् | = | देवैश्वर्यम् |
| कृष्ण | + | औत्कण्ठ्यम् | = | कृष्णौत्कण्ठ्यम् |
| गङ्गा | + | ओघः | = | गङ्गौघः |
| महा | + | औषधिः | = | महौषधिः |

### १३. एत्येधत्यूठ्सु ( पा. सू. ६. १. ८६ ) –

अवणदिजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात्। अर्थात् यदि **'अ'** वर्णानन्तरं एजादिः धातुः यथा एति, एधति अथवा ऊठ् शब्दः भवति तदा पूर्वपरयोः उभयोः वर्णयोः स्थाने वृद्धिरूपः एकादेशः भवति। सूत्रमिदम् **'एङि पररूपम्'** **'आद्गुणः'** इत्यनयोः सूत्रयोः बाधकम् अस्ति। उदाहरणम् –

| | | | | |
|---|---|---|---|---|
| उप | + | एति | = | उपैति |
| उप | + | एधते | = | उपैधते |
| प्रष्ठ | + | ऊहः | = | प्रष्ठौहः |

**विशेषः –** अत्र अकारानन्तरम् एजादि धातोः ए , ऊ स्तः अतः 'एङि पररूपम्' इत्यनेन प्राप्तं पररूपं 'आद्गुणः' इत्यनेन प्राप्तं गुणं च: बाधित्वा अकार-एकारयोः वर्णयोः स्थाने अनेन सूत्रेण वृद्धिरूपः एकादेशः अस्ति।

### १४. अक्षादूहिन्यामुपसंख्यानम् ( वार्तिक ) –

अक्षशब्दात् परे ऊहिनी शब्दः भवति तदा अकार ऊकारयोः स्थाने वृद्धिरूपः एकादेशः भवति।

यथा– अक्ष + ऊहिनी = अक्षौहिणी (सेना)

अत्र अकार-ऊकारयोः द्वयोः वर्णयोः स्थाने प्राप्तं गुणं बाधित्वा वृद्धिरूपः एकादेशः अस्ति।

### १५. प्रादूहोढोढ्योषैष्येषु ( वार्तिक ) –

प्र उपसर्गात् परे ऊहः, ऊढः, ऊढिः, एषः, एष्यः भवति तदा पूर्वपरयोः उभयोः वर्णयोः स्थाने वृद्धिरूपः एकादेशः भवति। सूत्रमिदम् 'वृद्धिरेचि' 'आद्गुणः' इत्यनयोः सूत्रयोः बाधकम् अस्ति। यथा –

| | | | | | |
|---|---|---|---|---|---|
| प्र | + | ऊहः | = | प्रौहः | (अ + ऊ = औ) |
| प्र | + | ऊढिः | = | प्रौढिः | (अ + ऊ = औ) |
| प्र | + | एषः | = | प्रैषः | (अ + ए = ऐ) |
| प्र | + | एष्यः | = | प्रैष्यः | (अ + ए = ऐ) |

## १६. एङि पररूपम् ( पा. सू. ६. १. ९१ ) –

अकारान्तात् उपसर्गात् परे धातोः आदौ एङ् (ए ओ)वर्णः भवति तर्हि तयोः पूर्वपरयोः द्वयोः वर्णयोः स्थाने पररूपमेकादेशः भवति। अत्र वृद्धिसन्धेः अपवादः। यथा –

| | | | | | |
|---|---|---|---|---|---|
| प्र | + | एजते | = | प्रेजते | (अ + ए = ए पररूपम्) |
| उप | + | ओषति | = | उपोषति | (अ + ओ = ओ पररूपम्) |

## १७. शकन्ध्वादिषु पररूपं वाच्यम् ( वार्तिक ) –

शकन्ध्वादिगणे ये शब्दाः पठिताः सन्ति तेषु टिसंज्ञकस्य अचः च स्थाने पररूपं वक्तव्यम् इत्यर्थः।

| | | | | | |
|---|---|---|---|---|---|
| यथा – | शक | + | अन्धुः | = | शकन्धुः |
| | कर्क | + | अन्धुः | = | कर्कन्धुः |
| | मृत | + | अण्डः | = | मार्तण्डः |

**विशेषः** – अत्र अकः 'सवर्णे दीर्घः' इति सूत्रेण प्राप्तं सवर्णदीर्घं बाधित्वा अनेन वार्तिकेन पररूपं।

## १८. अकः सवर्णे दीर्घः ( पा. सू. ६. १. ९७ ) –

'अच्' प्रत्याहारस्य परे सवर्णे अचि सति पूर्वपरयोः स्थाने दीर्घ–एकादेशः भवति। अत्र क्रमशः एतेषां स्थितिः उदाहरणानि च प्रस्तूयन्ते –

| | | | | | |
|---|---|---|---|---|---|
| दैत्य | + | अरिः | = | दैत्यारिः | (अ + अ = आ) |
| श्री | + | ईशः | = | श्रीशः | (अ + ई = ओ) |
| विष्णु | + | उदयः | = | विष्णूदयः | (उ + उ = ऊ) |
| भानु | + | ऊष्मा | = | भानूष्मा | (उ + ऊ = ऊ) |
| गुरु | + | उपदेशः | = | गुरूपदेशः | (उ + उ = ऊ) |
| होतृ | + | ऋकारः | = | होतृकारः | (ऋ + ऋ = ॠ) |
| पितृ | + | ऋणम् | = | पितृणम् | (ऋ + ऋ = ॠ) |

## १९. एङः पदान्तादति ( पा. सू. ६. १. १०५ ) –

पदान्तात् एङोऽति परे पूर्वरूपं एकादेशः स्यात्।

अर्थात् यदि पूर्वपदस्य अन्ते एङ् (ए ओ) उत्तरपदस्य प्रारम्भे च ह्रस्व अकारः भवति तदा पूर्वपरयोः वर्णयोः स्थाने पूर्वरूपं एकः आदेशः भवति। यथा –

| | | | | | |
|---|---|---|---|---|---|
| हरे | + | अव | = | हरेऽव | (ए + अ = पूर्वरूपम्) |
| विष्णो | + | अव | = | विष्णोऽव | (ओ + अ = पूर्वरूपम्) |

**विशेषः** – अत्र 'एङः पदान्तादति' सूत्रम् 'एचोऽयवायावः' इत्यस्य बाधकम् अस्ति। अत्र द्वयोः उदाहरणयोः **चम्पकपुष्पपुटकवास** न्यायेन 'ऽ' कृतः अस्ति।

## (२) हलसन्धिः–

यदा व्यञ्जनात् परे व्यञ्जनं अथवा स्वरः आयाति तदा हल् सन्धिः भवति।

### २०. 'स्तोः श्चुना श्चुः' (श्चुत्व सन्धिः) –

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः।

अर्थात् यदा स् त् थ् द् ध् न् इत्येते वर्णाः श् च् छ् ज् झ् ञ् इत्येतेषां वर्णानाम् पूर्वम् पश्चाद्वा आयान्ति तदा स् त् थ् द् ध् न् इत्येतेषां वर्णानां स्थाने क्रमशः श् च् छ् ज् झ् ञ् इत्येते वर्णाः भवन्ति। यथा –

| | | | | |
|---|---|---|---|---|
| सत् | + | चित् | = | सच्चित् |
| रामस् | + | चिनोति | = | रामश्चिनोति |
| हरिस् | + | शेते | = | हरिश्शेते |
| शार्ङ्गिन् | + | जयः | = | शार्ङ्गिञ्जय |
| रामस् | + | च | = | रामश्च |
| कस् | + | चित् | = | कश्चित् |
| उद् | + | ज्वलः | = | उज्ज्वलः |

### २१. 'ष्टुना ष्टुः' (ष्टुत्व सन्धिः)–

स्तोः ष्टुना योगे ष्टुः स्यात्।

यदा स् त् थ् द् ध् न् इत्येते वर्णाः ष् ट् ठ् ड् ढ् ण् इत्येतेषां वर्णानाम् पूर्वं पश्चात् वा आयान्ति तदा स् त् थ् द् ध् न् इत्येतेषां वर्णानां स्थाने क्रमशः ष् ट् ठ् ड् ढ् ण् इत्येते वर्णाः भवन्ति। यथा –

| | | | | |
|---|---|---|---|---|
| तत् | + | टीका | = | तट्टीका |
| रामस् | + | षष्ठः | = | रामष्षष्ठः |
| रामस् | + | टीकते | = | रामष्टीकते |
| चक्रिन् | + | ढौकसे | = | चक्रिण्ढौकसे |
| पेष् | + | ता | = | पेष्टा |
| राष् | + | त्रम् | = | राष्ट्रम् |
| उद् | + | डयनम् | = | उड्डयनम् |
| इष् | + | तः | = | इष्टः |

### २२. 'झलां जशोऽन्ते' (जश्त्व सन्धिः) –

पदान्ते झलां जशः स्युः।

पदान्ते झल् प्रत्याहारान्तर्गतवर्णानां (वर्गस्य १, २, ३, ४ वर्णानां श् ष् स् ह् वर्णानां च) स्थाने जश् प्रत्याहारस्य (ज् ब् ग् ड् द्) वर्णाः भवन्ति। यथा –

| | | | | |
|---|---|---|---|---|
| वाक् | + | ईश: | = | वागीश: |
| जगत् | + | ईश: | = | जगदीश: |
| षट् | + | आनन: | = | षडानन: |
| दिक् | + | अम्बर: | = | दिगम्बर: |
| अच् | + | अन्त: | = | अजन्त: |
| सुप् | + | अन्त: | = | सुबन्त: |
| षट् | + | दर्शनम् | = | षड्दर्शनम् |
| दिक् | + | गज: | = | दिग्गज: |

### २३. 'खरि च' (चर्त्व सन्धि:) –

खरि परे झलां चर: स्यु:।

खरि (वर्गस्य १, २, श् ष् स्) परे झलां (वर्गस्य १, २, ३, ४, श् ष् स् ह) स्थाने च (क् च् ट् त् प् श् ष् स्) प्रत्याहारस्य वर्णा: भवन्ति। यथा –

| | | | | |
|---|---|---|---|---|
| सद् | + | कार: | = | सत्कार: |
| विपद् | + | काल: | = | विपत्काल: |
| सम्पत् | + | समय: | = | सम्पत्समय: |
| ककुप् | + | प्रान्त: | = | ककुप्प्रान्त: |
| उद् | + | पन्न: | = | उत्पन्न: |

### २५. 'मोऽनुस्वार:' (अनुस्वार सन्धि:) –

मान्तस्य पदस्यानुस्वार: स्याद् हलि।

पदान्तस्य मकारस्य स्थाने अनुस्वार: आदेशो भवति हलि परत:। यथा –

| | | | | |
|---|---|---|---|---|
| हरिम् | + | वन्दे | = | हरिं वन्दे |
| गृहम् | + | गच्छति | = | गृहं गच्छति |
| दु:खम् | + | प्राप्नोति | = | दु:खं प्राप्नोति |
| त्वम् | + | पठसि | = | त्वं पठसि |
| अहम् | + | धावामि | = | अहं धावामि |
| सत्यम् | + | वद | = | सत्यं वद |

## ( ३ ) विसर्गसन्धि: –

यदा विसर्गस्य स्थाने किमपि परिवर्तनं भवति तदा स: विसर्गसन्धि: इति कथ्यते।

### २६. 'विसर्जनीयस्य स:' (सत्वसन्धि) –

खरि परे विसर्जनीयस्य स: स्यात्।

विसर्गस्य स्थाने सकारो भवति खरि (वर्गस्य १,२ श, ष् स्) परत:। यथा –

| | | | | |
|---|---|---|---|---|
| विष्णुः | + | त्राता | = | विष्णुस्त्राता |
| रामः | + | च | = | रामश्च |
| धनुः | + | टंकार | = | धनुष्टंकारः |
| निः | + | छलः | = | निश्छलः |

## २७. 'वा शरि' –

शरि विसर्गस्य विसर्गो वा स्यात्।

विसर्गस्य स्थाने विकल्पेन विसर्गादेशो भवति शरि (श् ष् स्) परे। यथा –

| | | | | |
|---|---|---|---|---|
| हरिः | + | शेते | = | हरिः शेते (हरिश्शेते) |
| निः | + | सन्देहः | = | निःसन्देह (निस्सन्देह) |
| नृपः | + | षष्ठः | = | नृपः षष्ठः (नृपष्षष्ठः) |

## २८. 'अतो रोरप्लुतादप्लुते' (उत्वसन्धिः) –

अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति।

ह्रस्वात् अकारात् उकारस्य रोः रेफस्य स्थाने उकारादेशो भवति ह्रस्वे अकारे परतः।

**विशेषः** – अः+अ इति स्थिते विसर्गस्य स्थाने ओकारस्य मात्रा भवति अन्तिम अकारस्य च स्थाने अवग्रहः (ऽ) भवति। अर्थात् उत्वसन्धेः अनन्तरं गुणसन्धिः पररूपसन्धिः च भवतः। यथा –

| | | | | |
|---|---|---|---|---|
| कः | + | अपि | = | कोऽपि |
| रामः | + | अवदत् | = | रामोऽवदत् |
| रामः | + | अयम् | = | रामोऽयम् |

## २९. 'हशि च' (उत्वसन्धिः) –

अप्लुतादतः परस्य रोरुः स्यात् हशि।

ह्रस्वात् अकारात् उत्तरस्य रोः रेफस्य स्थाने उकारादेशो भवति हशि (वर्गस्य ३, ४, ह् य् व् ल्) परतः।

**विशेषः** – अः + हश् (वर्गस्य ३, ४, ह् य् व् ल् इति स्थिते विसर्गस्य स्थाने ओकारस्य मात्रा भवति। अर्थात् उत्वसन्धेः अनन्तरं गुणसन्धिः भवति। यथा –

| | | | | |
|---|---|---|---|---|
| शिवः | + | वन्द्यः | = | शिवो वन्द्यः |
| रामः | + | हसति | = | रामो हसति |
| बुधः | + | लिखति | = | बुधो लिखति |
| बालः | + | रोदिति | = | बालो रोदिति |
| नमः | + | नमः | = | नमो नमः |
| क्षीणः | + | भवति | = | क्षीणो भवति |
| मनः | + | हरः | = | मनोहरः |

❀ ❀ ❀

## अभ्यासः

### (क) वस्तुनिष्ठप्रश्नाः-

(१) जश्त्वसन्धेः उदाहरणम् अस्ति –

(क) षण्मुखः (ख) सच्चित्

(ग) वागीशः (घ) मनोहरः ( )

(२) ष्टुत्व सन्धेः उदाहरणम् अस्ति –

(क) तट्टीका (ख) रामश्शेते

(ग) तन्मयः (घ) हरिं वन्दे ( )

(३) 'इतस्ततः' इति शब्दे सन्धिः अस्ति –

(क) व्यंजनसन्धिः (ख) अच्सन्धिः

(ग) विसर्गलोपसन्धिः (घ) विसर्गसन्धिः ( )

(४) 'शिवोऽर्च्यः' इति शब्दे सन्धिः अस्ति –

(क) ष्टुत्व सन्धिः (ख) चर्त्वसन्धिः

(ग) उत्वसन्धिः (घ) सत्वसन्धिः ( )

(५) अनुस्वारसन्धेः उदाहरणम् अस्ति–

(क) विद्वाँल्लिखति (ख) हरिं वन्दे

(ग) कश्चित् (घ) नमस्ते ( )

### (ख) निम्नलिखितपदेषु सन्धिविच्छेदः कर्तव्यः –

परमार्थः –

रामोऽपि –

वागीशः –

पावकः –

विष्णुस्त्राता –

महेशः –

सत्कारः –

### (ग) निम्नलिखितपदेषु सन्धिविच्छेदं कृत्वा सन्धेः नाम लेखनीयम् –

| पदम् | सन्धि विच्छेदः | सन्धेः नाम |
|---|---|---|
| दिगम्बरः | ......................... | ..................... |
| शत्रूञ्जयति | ........................... | ...................... |
| धर्मं चर | ........................... | ...................... |
| सुबन्तः | ........................... | ....................... |

| | | |
|---|---|---|
| परीक्षोत्सवः | .......................... | ..................... |
| पवित्रः | .......................... | ..................... |
| कोऽपि | .......................... | ..................... |
| सुध्युपास्यः | .......................... | ..................... |
| प्रष्ठौहः | .......................... | ..................... |
| अभ्युपैति | .......................... | ..................... |

**( घ ) अधोलिखितपदेषु सन्धिकार्यं कुरुत –**

| | | |
|---|---|---|
| उत् + चारणम् | – | .................................... |
| धनुः + टंकारः | – | .................................... |
| मनः + तापः | – | .................................... |
| अनु + अयः | – | .................................... |
| राज + ऋषिः | – | .................................... |
| लोको + अयम् | – | .................................... |
| गो + एषणा | – | .................................... |

**( ङ) 'क' खण्डं 'ख' खण्डेन सह योजयत।**

| 'क' खण्डः | 'ख' खण्डः |
|---|---|
| श्चुत्वसन्धिः | तत्फलम् |
| चर्त्वसन्धिः | नमो नमः |
| उत्वसन्धिः | एतज्जलम् |
| जश्त्वसन्धिः | सत्यं वद |
| अनुस्वारसन्धिः | चिदानन्द |
| अयादिसन्धिः | लोकैषणा |
| पररूपसन्धिः | भवति |
| वृद्धिसन्धिः | उपोषति |

**उत्तरमाला– वस्तुनिष्ठप्रश्नाः**

(१) ग (२) क (३) घ (४) ग (५) ख

❀ ❀ ❀

## ( ख ) समासप्रकरणम् –

समसनं समासः अथवा अनेकपदानाम् एकपदीभवनं समासः अर्थात् यदा अनेकपदानि मिलित्वा एकपदं जायन्ते तदा सः समासः इति कथ्यते। सम् उपसर्गपूर्वकात् अस् धातोः घञि प्रत्यये कृते 'समासः' इति शब्दो निष्पद्यते। समासशब्दस्य अर्थः संक्षिप्तीकरणमिति अस्ति।

समासः पञ्चधा। विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः समासः। प्रायेण उत्तरपदार्थप्रधानस्तत्पुरुषः तृतीयः समासः। तत्पुरुषभेदः कर्मधारयः। कर्मधारयभेदो द्विगुः। प्रायेण–अन्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः समासः। प्रायेण–उभयपदार्थप्रधानः द्वन्द्वः समासः पञ्चमः। एवं समासः पञ्चधाः।

### ( १ ) केवलसमासः –

| | | |
|---|---|---|
| पूर्वं भूतः | = | भूतपूर्वः |
| वागर्थौ इव | = | वागर्थाविव |

### ( २ ) अव्ययीभावसमासः

यदा विभक्ति–इत्यादिषु अर्थेषु वर्तमानम् अव्ययं पदं सुबन्तेन सह नित्यं समस्यते तदा असौ अव्ययीभावसमासो भवति। अथवा इदमत्र अवगन्तव्यम् –

(क) अस्य समासस्य प्रथमशब्दः अव्ययं द्वितीयश्च संज्ञाशब्दो भवति।

(ख) अव्ययशब्दार्थस्य अर्थात् पूर्वपदार्थस्य प्रधानता भवति।

(ग) समासस्य पदद्वयं मिलित्वा अव्ययं भवति।

(घ) अव्ययीभावसमासः नपुंसकलिङ्गस्य एकवचने भवति। यथा–

| विग्रह | अव्ययपदम् | अव्ययस्यार्थः | समस्तपदम् |
|---|---|---|---|
| हरौ इति | अधि | सप्तमीविभक्त्यर्थे | अधिहरि |
| कृष्णस्य समीपम् | उप | समीपार्थे | उपकृष्णम् |
| मद्राणां समृद्धिः | सु | समृद्धि अर्थे | सुमद्रम् |
| यवनानां व्यृद्धि | दुर् | दुर्गतिः अर्थे | दुर्यवनम् |
| मक्षिकाणाम् अभावः | निर् | अभावार्थे | निर्मक्षिकम् |
| हिमस्य अत्ययः | अति | समाप्त्यर्थे | अतिहिमम् |
| निद्रा सम्प्रति न युज्यते | अति | अनुचितार्थे | अतिनिद्रम् |
| हरिशब्दस्य प्रकाशः | इति | शब्द–प्रादुर्भावः | इतिहरि |
| विष्णोः पश्चात् | अनु | पश्चात् | अनुविष्णु |
| रूपस्य योग्यम् | अनु | योग्यतार्थे | अनुरूपम् |
| दिनं दिनं प्रति | प्रति | वीप्सार्थे | प्रतिदिनम् |

## ( ३ ) तत्पुरुष समासः –

तत्पुरुषसमासे प्रायेण उत्तरपदार्थस्य प्रधानता भवति। यथा– राज्ञः पुरुष– राजपुरुषः। अत्र उत्तरपदं पुरुषः अस्ति तस्य एव प्रधानता अस्ति। 'राजपुरुषम् आनय' इति उक्ते सति पुरुषः एव आनीयते न तु राजा। तत्पुरुषसमासे पूर्वपदे या विभक्तिः भवति प्रायेण तस्याः नाम्ना एव समासस्य नाम भवति यथा –

| | | | |
|---|---|---|---|
| **( द्वितीयातत्पुरुषः )** | कृष्णं श्रितः | = | कृष्णश्रितः |
| | दुःखम् अतीतः | = | दुःखातीतः |
| | नरकं पतितः | = | नरकपतितः |
| | ग्रामं गतः | = | ग्रामगतः |
| | स्वर्गं गतः | = | स्वर्गगतः |
| | सुखं प्राप्तः | = | सुखप्राप्तः |
| **( तृतीयातत्पुरुषः )** | शङ्कुलया खण्डः | = | शङ्कुलाखण्डः |
| | हरिणा त्रातः | = | हरित्रातः |
| | धान्येन अर्थः | = | धान्यार्थः |
| | पुण्येन अर्थः | = | पुण्यार्थः |
| **( चतुर्थीतत्पुरुषः )** | भूतेभ्यः बलिः | = | भूतबलिः |
| | यूपाय दारु | = | यूपदारु |
| | गोभ्यः हितम् | = | गोहितम् |
| | गोभ्यः सुखम् | = | गोसुखम् |
| **( पञ्चमीतत्पुरुषः )** | चोराद् भयम् | = | चोरभयम् |
| | गुरोः भीतः | = | गुरुभीतः |
| **( षष्ठीतत्पुरुषः )** | राज्ञः पुरुषः | = | राजपुरुषः |
| **( सप्तमीतत्पुरुषः )** | अक्षेषु शौण्डः | = | अक्षशौण्डः |
| | विद्यायाम् निपुणः | = | विद्यानिपुणः |

## कर्मधारयः –

यदा तत्पुरुषसमासस्य द्वयोः पदयोः एकविभक्तिः अर्थात् समानविभक्तिः भवति तदा सः समानाधिकरण तत्पुरुषसमासः कथ्यते। अयमेव समासः कर्मधारय इति नाम्ना ज्ञायते। अस्मिन् समासे साधारणतया पूर्वपदं विशेषणम् उत्तरपदश्च विशेष्यं भवति। यथा– नीलम् कमलम् = नीलकमलम्

(क) अस्मिन् उदाहरणे नीलम् कमलम् इति द्वयोः पदयोः समानविभक्तिः अर्थात् प्रथमा विभक्तिः अस्ति।

(ख) अत्र नीलम् इति पदं विशेषणम् कमलम् इति पदं च विशेष्यम्। अत एव अयं कर्मधारयः समासः अस्ति।

### विशेषण–विशेष्यकर्मधारयः –

पीतम् अम्बरम् इति = पीताम्बरम्

| | | | |
|---|---|---|---|
| | रक्तम् कमलम् इति | = | रक्तकमलम् |
| | वीरः पुरुषः इति | = | वीरपुरुषः |
| | दीर्घा रज्जुः इति | = | दीर्घरज्जुः |
| | कुत्सितः राजा इति | = | कुराजा |
| | महान् पुरुषः इति | = | महापुरुषः |
| | कृष्णः सर्पः | = | कृष्णसर्पः |
| **उपमानोपमेय कर्मधारयः–** | घनः इव श्यामः इति | = | घनश्यामः |
| | कर्पूर इव गौरः | = | कर्पूरगौरः |
| | चन्द्रः इव मुखम् | = | चन्द्रमुखम् |
| | शैल इव उन्नतः इति | = | शैलोन्नतः |
| | वज्रम् इव कठोरम् इति | = | वज्रकठोरम् |
| **नञ् तत्पुरुषः –** | न ब्राह्मणः | = | अब्राह्मणः |
| | न अश्वः | = | अनश्वः |
| **उपमानोत्तरपद कर्मधारयः –** | | | |
| | पुरुषः व्याघ्रः इव | = | पुरुषव्याघ्रः |
| | पुरुषः सिंहः इव | = | पुरुषसिंहः |
| | पुरुषः ऋषभः इव | = | पुरुषर्षभः |
| | करः किसलयम् इव | = | करकिसलयम् |
| | मुखम् कमलम् इव | = | मुखकमलम् |
| **अवधारणापूर्वपद कर्मधारयः –** यथा – | | | |
| | तपः एव धनम् | = | तपोधनम् |
| | विद्या एव धनम् | = | विद्याधनम् |
| | गुरुः एव देवः | = | गुरुदेवः |
| | वेदः एव सम्पत् | = | वेदसम्पत् |
| **उपपद तत्पुरुषः –** | कुम्भं करोति | = | कुम्भकारः |
| | सूत्रं करोति | = | सूत्रकारः |
| **कुसंज्ञकतत्पुरुषः –** | कुत्सितः पुरुषः | = | कुपुरुषः |

**द्विगुसमासः** – 'संख्यापूर्वो द्विगु' इति पाणिनीयसूत्रानुसारं यदा कर्मधारयसमासस्य पूर्वपदं संख्यावाची उत्तरपदञ्च संज्ञावाची भवति तदा सः 'द्विगुसमासः' कथ्यते। अयं समासः प्रायः समूहार्थे भवति। समस्तपदं सामान्यतया नपुंसकलिङ्गस्य एकवचने अथवा स्त्रीलिङ्गस्य एकवचने भवति। यथा –

| | | |
|---|---|---|
| त्रयाणां भुवनानां समाहारः इति | = | त्रिभुवनम् |
| पञ्चानां पात्राणां समाहारः इति | = | पञ्चपात्रम् |
| चतुर्णां युगानां समाहारः इति | = | चतुर्युगम् |

**कुत्रचित् द्विगुसमासः ईकारान्तस्त्रीलिङ्गेऽपि भवति यथा –**

| | | |
|---|---|---|
| पञ्चानां वटानां समाहारः इति | = | पञ्चवटी |
| अष्टानाम् अध्यायानां समाहारः इति | = | अष्टाध्यायी |
| सप्तानां शतानां समाहारः इति | = | सप्तशती |
| शतानाम् अब्दानां समाहारः इति | = | शताब्दी |

**( ४ ) बहुव्रीहिसमासः – 'अनेकमन्यपदार्थे'** । यस्मिन् समासे यदा अन्यपदार्थस्य प्रधानता भवति तदा सः बहुव्रीहिसमासः कथ्यते। अर्थात् न तु पूर्वपदार्थस्य प्रधानता भवति न हि उत्तरपदार्थस्य प्रत्युत द्वौ अपि पदार्थौ मिलित्वा अन्यपदार्थस्य बोधं कारयतः। यथा –

**समानाधिकरण-बहुव्रीहिः –**

| | | |
|---|---|---|
| कण्ठे कालः यस्य सः | = | कण्ठेकालः |
| प्राप्तम् उदकं यं सः | = | प्राप्तोदकः (ग्रामः) |
| हताः शत्रवः येन सः | = | हतशत्रुः (राजा) |
| दत्तं भोजनं यस्मै सः | = | दत्तभोजनः (भिक्षुकः) |
| पतितं पर्णं यस्मात् सः | = | पतितपर्णः (वृक्षः) |
| दश आननानि यस्य सः | = | दशाननः (रावणः) |
| वीरा पुरुषाः यस्मिन् (ग्रामे) सः | = | वीरपुरुषः (ग्रामः) |
| चत्वारि मुखानि यस्य सः | = | चतुर्मुखः (ब्रह्मा) |

**व्यधिकरणबहुव्रीहिः –**

| | | |
|---|---|---|
| चन्द्रः शेखरे यस्य सः | = | चन्द्रशेखरः (शिवः) |
| चक्रं पाणौ यस्य सः | = | चक्रपाणिः (विष्णुः) |
| शूलं पाणौ यस्य सः | = | शूलपाणिः (शिवः) |
| धनुः पाणौ यस्य सः | = | धनुष्पाणिः (रामः) |

**तुल्ययोगेबहुव्रीहिः –**

| | | |
|---|---|---|
| पुत्रेण सहितः | = | सपुत्रः |
| बान्धवैः सहितः | = | सबान्धवः |
| विनयेन सह विद्यमानम् | = | सविनयम् |
| आदरेण सह विद्यमानम् | = | सादरम् |
| पत्न्या सह वर्तमानः | = | सपत्नीकः (वशिष्ठः) |

**उपमानवाचकबहुव्रीहिः –**

| | | |
|---|---|---|
| चन्द्र इव मुखं यस्याः सा | = | चन्द्रमुखी |
| पाषाणवत् हृदयं यस्य सः | = | पाषाणहृदयः |

## (५) द्वन्द्वसमासः –

**'चार्थे द्वन्द्वः'** अर्थात् द्वन्द्वसमासे परस्परं साकांक्षयोः पदयोः मध्ये 'च' आगच्छति, अतएव द्वन्द्वसमासः उभयपदार्थप्रधानः भवति। यथा– धर्मः च अर्थः च– धर्मार्थौ। अत्र पूर्वपदं धर्मः उत्तरपदम् अर्थः अनयोः द्वयोः अपि प्रधानता अस्ति। द्वन्द्वसमासे समस्तपदं प्रायशः द्विवचने बहुवचने वा भवति।

उदाहरणानि–

**इतरेतर द्वन्द्वः–**

| | | |
|---|---|---|
| हरिश्च हरश्च | = | हरिहरौ। |
| ईशश्च कृष्णश्च | = | ईशकृष्णौ |
| व्यासश्च कपिलश्च | = | व्यासकपिलौ |
| रामश्च श्यामश्च मोहनश्च | = | रामश्याममोहनाः |
| शिवश्च केशवश्च | = | शिवकेशवौ |
| माता च पिता च | = | मातापितरौ |

**एकशेष द्वन्द्वः–** माता च पिता च = पितरौ

**समाहारद्वन्द्वः–** समाहार (समूहः) अर्थे द्वन्द्वसमासस्य प्रायेण नपुंसकलिङ्गे एकवचने प्रयोगः भवति। यथा –

| | | |
|---|---|---|
| पाणी च पादौ च एषां समाहारः | = | पाणिपादम् |
| शिरश्च ग्रीवा च अनयोः समाहारः | = | शिरोग्रीवा |
| रथिकाश्च अश्वारोहाश्च एषां समाहारः | = | रथिकाश्वरोहम् |
| वाक् च त्वक् च अनयोः समाहारः | = | वाक्त्वचम् |
| छत्रं च उपानह् च अनयोः समाहारः | = | छत्रोपानहम् |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

(१) अव्ययीभावसमासस्य उदाहरणम् अस्ति–

(क) यथामति (ख) पापपुण्यौ

(ग) राजपुरुषः (घ) पंचवटी ( )

(२) कर्मधारयसमासस्य उदाहरणम् अस्ति–

(क) रामकृष्णौ (ख) पीताम्बरः

(ग) सुमद्रम् (घ) शताब्दीः ( )

(३) घनश्यामः इति पदे समासः अस्ति –

(क) बहुव्रीहिः (ख) कर्मधारयः

(ग) अव्ययीभावः (घ) द्विगुः ( )

(४) बहुव्रीहिसमासस्य उदाहरणम् अस्ति–

(क) महापुरुषः (ख) चतुर्युगः

(ग) उपकृष्णम् (घ) कण्ठेकालः ( )

(५) द्वन्द्वसमासस्य उदाहरणम् अस्ति–

(क) भ्रातरौ (ख) दशपात्रम्

(ग) अनुरथम् (घ) महापुरुषः ( )

**(क) निम्नलिखितपदानां समासविग्रहः कर्तव्यः –**

कृष्णसर्पः –

सेवाधर्मः –

प्रतिदिनम् –

नरोत्तमः –

महाशयः –

पापमुक्तः –

अप्रियः –

अनिष्टः –

जलमग्नः –

शिवालयः –

कुपुत्रः –

**( ख ) निम्नलिखितपदानां समासविग्रहं कृत्वा समासस्य नामापि लेखनीयम् –**

| समस्तपदम् | विग्रहः | समासस्य नाम |
|---|---|---|
| अनुरथम् | | |
| सप्तपदी | | |
| भुक्तभोगः | | |
| धर्मभ्रष्टः | | |
| मासोनः | | |
| धर्मार्थौ | | |
| सप्तशती | | |
| विद्याहीनः | | |

**( ग ) निम्नलिखितविग्रहवाक्यानां समासः करणीयः –**

समान उदरो यस्य –

मुखं कमलम् इव –

पुत्रीश्च पुत्रश्च –

शोभनः पुरुषः –

देवेन दत्तः –

रूपस्य योग्यम् –

तेन कृतम् –

**( घ ) 'क' खण्डं 'ख' खण्डेन सह योजयत।**

| क खण्डः | ख खण्डः |
|---|---|
| द्वन्द्वसमासः | शताब्दी |
| बहुव्रीहिसमासः | उपवनम् |
| अव्ययीभावसमासः | कुसुमकोमलम् |
| द्विगुसमासः | शूलपाणिः |
| कर्मधारयसमासः | नरश्रेष्ठः |
| तत्पुरुषसमासः | रामलक्ष्मणौ |

**उत्तरमाला– वस्तुनिष्ठप्रश्नाः**

(१) क (२) ख (३) ख (४) घ (५) क

❀ ❀ ❀

## ( ग ) कारकप्रकरणम्–

'क्रियाजनकत्वं कारकम् अथवा क्रियां करोति निर्वर्तयति इति कारकम्।' वैयाकरणाः कारकस्य अनेकानि लक्षणानि प्रस्तुवन्ति । यथा –

१. क्रियाजनकत्वं कारकत्वम्।

२. क्रियानिष्पादकत्वं कारकत्वम् ।

३. क्रियान्वयित्वं कारकत्वम्।

एवं यः क्रियां सम्पादयति अथवा यस्य क्रियया सह साक्षात् परम्परया वा सम्बन्धो भवति सः 'कारक' इति कथ्यते।

**कारकभेदाः** – संस्कृत व्याकरणे षट्कारकाणि भवन्ति। यथा –

**कर्त्ता कर्म च करणं च सम्प्रदानं तथैव च।**
**अपादानाधिकरणं चेत्याहुः कारकाणि षट्।।**

अर्थात् कर्ता, कर्म, करणम्, सम्प्रदानं अपादानम्, अधिकरणम्। सम्बोधने प्रथमा विभक्तिः एव भवति, अतः अस्य परिगणनं प्रथमायामेव भवति। सम्बन्धस्य परिगणना कारकान्तर्गते न भवति। अस्य इदं कारणमस्ति यत् सम्बन्धस्य क्रियया सह साक्षात् योगः न भवति। उदाहरणतः **देवदत्तः रामस्य पुस्तकं पठति** अस्मिन् वाक्ये देवदत्तस्य पठनक्रियया सह योगः अस्ति किन्तु रामस्य सम्बन्धः न पठनक्रियया अपितु 'पुस्तकेन' । अतः रामशब्दे विद्यमानायाः षष्ठीविभक्त्याः अर्थः 'सम्बन्धः' कारकरूपेण न गृह्यते। अत एवेदं प्रसिद्धमस्ति यत् – षष्ठ्याः कारकत्वं नास्ति।

### कर्त्तृकारकम् (प्रथमा–विभक्तिः)

यः क्रियायाः करणे स्वतन्त्रः भवति सः कर्त्ता इति कथ्यते। (स्वतन्त्रः कर्त्ता/पा. १. ४. ५४) उक्तकर्तरि च प्रथमा विभक्तिः भवति। यथा – रामः पठति।

**( १ ) प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** (पा. सू. २. ३.४६) = प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये, परिमाणमात्रे, वचन (संख्या) मात्रे च प्रथमा विभक्तिः भवति। सार्थकशब्दस्वरूपं प्रातिपदिकं कथ्यते। यस्य प्रातिपदिकस्य उच्चारणमात्रेण कस्यापि नियतस्य निश्चितस्य वा अर्थस्य ज्ञानम् भवति असौ प्रातिपदिकार्थः कथ्यते।

**उदाहरणम्** – प्रातिपदिकार्थमात्रे – कृष्णः, श्रीः, ज्ञानम् । लिङ्गमात्रस्य आधिक्ये – तटः , तटी, तटम्। परिमाणमात्रे – द्रोणो व्रीहिः। वचनमात्रे – एकः, द्वौ: बहवः।

कर्मवाच्यस्य कर्मणि प्रथमा विभक्तिः भवति। यथा– मया ग्रन्थः पठ्यते।

**( २ ) सम्बोधने च** – (पा. सू. २. ३. ४७) =सम्बोधने अर्थात् अभिमुखीकरणे प्रथमा विभक्तिः भवति। यथा– हे राम ! (माम् रक्ष) ।अत्र रामम् अभिमुखीकरणे प्रथमा विभक्त्याः प्रयोगः भवति।

## कर्मकारकम् (द्वितीया विभक्तिः)

**(३) कर्तुरीप्सिततमं कर्म** (पा. सू. १.४.४९) अर्थात् कर्ता स्वक्रियया अत्यधिकरूपेण यं इच्छति अभिलषति वा तस्य कर्मसंज्ञा भवति।

उदाहरणम् – सः ग्रामं गच्छति।

**(४) कर्मणि द्वितीया** (पा. सू. २. ३. २) – यस्य कर्मसंज्ञा भवति तस्मिन् अनुक्ते = अप्रधाने कर्मणि द्वितीया विभक्तिः भवति। वाच्यं त्रिविधं भवति – कर्तृवाच्यं, कर्मवाच्यं भाववाच्यं च। कर्तृवाच्ये कर्ता उक्तः(प्रधानः)भवति कर्म च अनुक्तम् (अप्रधानम्) भवति। कर्तुः प्रधानतया क्रियायाः प्रयोगः कर्तृपदानुसारेण भवति। अर्थात् एकवचनेन कर्त्रा सह एकवचनस्य क्रियायाः प्रयोगः, एवं द्विवचनस्य बहुवचनस्य वा कर्तुः प्रयोगदशायां क्रिया अपि द्विवचनस्य बहुवचनस्य वा भवति।

कर्म इत्यस्य अनुक्तत्वात् = अप्रधानत्वात् तस्मिन् द्वितीयाविभक्तेः प्रयोगः भवति। किन्तु कर्मवाच्ये कर्म प्रधानं कर्ता च अप्रधानं च भवति। अतः प्रधाने = मुख्ये कर्मणि प्रथमा विभक्तिः अप्रधाने = गौणे कर्तरि च तृतीयाविभक्तेः प्रयोगः भवति। भाववाच्ये क्रियायाः एव प्राधान्यं भवति। अत्र अकर्मकधातोः प्रयोगः भवति।

उदाहरणम् – देवदत्तः **हरिं** भजति। अस्मिन् वाक्ये कर्ता 'देवदत्तः' अस्ति। तस्य भजनक्रियया अतिशयेन ईप्सितः 'हरिः' अस्ति। अतः 'कर्तुरीप्सिततमं कर्म' इत्यनेन सूत्रेण 'हरि' शब्दस्य कर्मसंज्ञा भवति। 'कर्मणि द्वितीया' इत्यनेन तस्मिन् अप्रधाने कर्मणि द्वितीया विभक्तिः भवति।

**(५) अकथितं च** (पा. सू./१.४.५१) – अपादानादिविशेषैः अविवक्षितं कारकं कर्मसंज्ञं स्यात्। अर्थात् अपादानेन सम्प्रदानेन करणेन अधिकरणेन च यस्य कारकस्य कथनस्य इच्छा न भवति तस्य कर्मसंज्ञा भवति। संस्कृतभाषायां तादृशाः षोड्शधातवः सन्ति येषां प्रयोगे एकं तु मुख्यं कर्म भवति अपरञ्च अपादानादिकारकैः अविवक्षितं गौणं कर्म भवति। अस्मिन् गौणे कर्मणि एव अत्र द्वितीया विभक्तिः भवति। इमे धातवः एव द्विकर्मकधातवः कथ्यन्ते एतेषां प्रयोगः अत्र क्रियते –

| | | |
|---|---|---|
| दुह् (दुहना)<br>(गोपाल गाय से दूध दुहता है) | – | गोपालः **गां दुग्धं** दोग्धि। |
| याच् (मांगना)<br>(सुरेश महेश से पुस्तक मांगता है) | – | सुरेशः **महेशं पुस्तकं** याचते। |
| पच् (पकाना)<br>(पाचक चावलों से भात पकाता है) | – | पाचकः **तण्डुलान् ओदनं** पचति। |
| दण्ड् (दण्ड देना)<br>(राजा गर्गों को सौ रूपये का दण्ड देता है) | – | राजा **गर्गान् शतं** दण्डयति। |
| प्रच्छ् (पूछना)<br>(वह बालक से मार्ग पूछता है) | – | सः **माणवकं पन्थानं** पृच्छति। |
| रुध् (रोकना)<br>(ग्वाला गाय को व्रज में रोकता है) | – | ग्वालः **गां व्रजम्** अवरुणद्धि। |

| | | |
|---|---|---|
| चि (चुनना) | – | मालाकार: **लतां पुष्पं** चिनोति। |
| (माली लता से पुष्प चुनता है) | | |
| ब्रू (बोलना) / शास् (कहना) | – | गुरु **शिष्यं धर्मं** ब्रूते/शास्ति वा । |
| (गुरु शिष्य से धर्म कहता है) | | |
| मथ् (मथना) | – | स: **क्षीरनिधिं सुधां** मथ्नाति। |
| (वह क्षीरसागर से अमृत मथता है) | | |
| मुष् (चुराना) | – | चौर: **देवदत्तं धनं** मुष्णाति। |
| (चोर देवदत्त से धन चुराता है | | |
| जि (जीतना) | – | नृप: **शत्रुं राज्यं** जयति। |
| (राजा शत्रु से राज्य को जीतता है) | | |
| नी (ले जाना) | – | स: **अजां ग्रामं** नयति। |
| (वह बकरी को गांव ले जाता है) | | |
| हृ (हरण करना) | – | स: **कृपणं धनं** हरति। |
| (वह कंजूस के धन को हरता है) | | |
| वह् (ले जाना) | – | कृषक: **ग्रामं भारं** वहति। |
| (किसान गांव में बोझा ले जाता है) | | |
| कृष् (खींचना) | – | कृषक: **क्षेत्रं महिषीं** कर्षति। |
| (किसान खेत में भैंस को खींचता है) | | |

**(६) अधिशीङ्स्थासां कर्म** (पा. सू. १.४.४६) – **अधि**–उपसर्गपूर्वक–शीङ्–स्था–आस्–धातूनां प्रयोगे एषाम् आधारस्य कर्मसंज्ञा भवति कर्मणि च द्वितीया विभक्ति: भवति। यथा –

| | | |
|---|---|---|
| अधिशेते (सोता है) | – | सुरेश: **शय्याम्** अधिशेते। |
| अधितिष्ठति (बैठता है) | – | अध्यापक: **आसन्दिकाम्** अधितिष्ठिति। |
| अध्यास्ते (बैठता है) | – | नृप: **सिंहासनम्** अध्यास्ते। |

**(७) अभिनिविशश्च** (पा. सू. १. ४. ४७) – उपसर्गद्वयपूर्वक–विश्–धातो: प्रयोगे सति आधारवाचकस्य शब्दस्य कर्म–संज्ञा भवति कर्मणि च द्वितीया विभक्ति: भवति। यथा –

अभिनिविशते (प्रवेश करता है) – दिनेश: अभिनिविशते सन्मार्गम्।

**(८) उपान्वध्याङ्वस:** (पा. सू. १.४.४८) – उप–अनु–अधि–आङ्(आ)–उपसर्गपूर्वक–वस् धातो: प्रयोगे अस्य आधारस्य कर्मसंज्ञा भवति कर्मणि च द्वितीया विभक्ति: भवति। यथा –

| | | |
|---|---|---|
| उपवसति (पास में रहता है) | – | श्याम: **नगरम्** उपवसति |
| अनुवसति (पीछे रहता है) | – | कुलदीप: **गृहम्** अनुवसति। |
| अधिवसति (में रहता है) | – | सुरेश: **जयपुरम्** अधिवसति। |
| आवसति (रहता है) | – | हरि: **वैकुण्ठम्** आवसति। |

**(९) अभुक्त्यर्थस्य न (वा.)** – यदि 'उप उपसर्गपूर्वक 'वस' धातोः उपवास( भोजनाभावः) अर्थः भवति तदा तस्य आधारवाचकस्य शब्दस्य कर्मसंज्ञा न भवति अपितु अधिकरणसंज्ञया तत्र सप्तमी विभक्तिः भवति। यथा – वने उपवसति।

अत्र 'उप' उपसर्गपूर्वक 'वस्' धातोः प्रयोगः उपवासार्थे अस्ति न तु निवासे अर्थे। अतः तस्य आधारवाचकस्य 'वन' शब्दस्य उपान्वध्याङ्वसः सूत्रेण प्राप्तायाः कर्मसंज्ञायाः अनेन वार्तिकेन निषेधः। फलतः 'वन' शब्दे अधिकरणसंज्ञा तथा च सप्तमी विभक्तिः अस्ति।

**(१०) उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।**
**द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।। (वा.)** –

उभयतः, सर्वतः योगे द्वितीया भवति। धिक्, उपरि-उपरि, अधि-अधि, अधः-अधः, इत्यादिषु त्रिषु आम्रेडित (वारद्वयं कथन)दशायां द्वितीया भवति। यथा –

| | | |
|---|---|---|
| उभयतः | – | उभयतः कृष्णं गोपाः । |
| सर्वतः | – | सर्वतः कृष्णं गोपाः । |
| धिक् | – | धिक् दुर्जनम् । |
| अधोऽधः (सबसे नीचे) | – | भूमिम् अधोऽधः जलम् अस्ति। |
| अध्यधि (अन्दर-अन्दर) | – | लोकम् अध्यधि हरिः अस्ति। |
| उपर्युपरि (ऊपर-ऊपर) | – | लोकम् उपर्युपरि सूर्यः अस्ति। |

**(११) अभितः परितः समया निकषा हा प्रतियोगेऽपि (वा.)** – अभितः, परितः, समया, निकषा, हा, प्रति एषां योगेऽपि द्वितीया विभक्तिः भवति। यथा –

| | | |
|---|---|---|
| अभितः (दोनों ओर) | – | राजमार्गम् अभितः वृक्षाः सन्ति। |
| परितः (चारों ओर) | – | ग्रामं परितः क्षेत्राणि सन्ति। |
| समया निकषा (समीप में) | – | विद्यालयं निकषा देवालयः अस्ति। |
| हा (हाय) | – | दुर्जनं हा |
| प्रति (ओर) | – | छात्राः विद्यालयं प्रति गच्छन्ति। |

**(१२) अन्तराऽन्तरेण युक्ते** (पा. सू. २. ३. ४) – अर्थात् अन्तरा (मध्ये), अन्तरेण (विना) इति द्वयोः अव्यययोः योगे द्वितीया विभक्तिः भवति इत्यर्थः। यथा –

| | | |
|---|---|---|
| अन्तरेण/विना (बिना) | – | प्रदीपः पुस्तकं विना / अन्तरेण पठति। |
| अन्तरा (बीच में) | – | रामं श्यामं च अन्तरा देवदत्तः अस्ति। |

**(१३) कालाध्वनोरत्यन्तसंयोगे** (पा. सू. २. ३. ५) – कालवाचिनि शब्दे मार्गवाचिनि शब्दे च अत्यन्तसंयोगे निरन्तरसंयोगे वा गम्यमाने द्वितीया विभक्तिः भवति। यथा –

मासं कल्याणी (कालवाचक गुणात्यन्तसंयोगः), मासम् अधीते (कालवाचकक्रियात्यन्तसंयोगः), मासं गुडधानाः (कालवाचक द्रव्यात्यन्तसंयोगः), क्रोशं कुटिला नदी (अध्ववाचक गुणात्यन्तसंयोगः), क्रोशम् अधीते (अध्ववाचक गुणात्यन्तसंयोगः), क्रोशं गिरिः (अध्ववाचक गुणात्यन्तसंयोगः)।

एषु उदाहरणेषु कालवाचकशब्दस्य अध्ववाचकशब्दस्य च गुणक्रियाद्रव्यैः अत्यन्तसंयोगः दृश्यते अतः मासशब्दे क्रोशशब्दे च द्वितीया विभक्तिः।

## करणकारकम् (तृतीयाविभक्तिः)

**(१३) साधकतमं करणम्** (पा. सू. १. ४. ४२)- क्रियायाः सिद्धौ यत् सर्वाधिकं सहायकं भवति तस्य कारकस्य करणसंज्ञा भवति। अर्थात् कर्तृद्वारा क्रियमाणायां क्रियायां यः अतिशयेन सहायकः तस्य करणसंज्ञा भवति।

**(१४) कर्तृकरणयोस्तृतीया** (पा. सू. २. ३. १८) - अनुक्ते कर्तरि करणे च तृतीया विभक्ति स्यात्। अर्थात् अप्रधाने कर्तरि करणे च तृतीया विभक्तिः भवति। यथा -

**रामेण बाणेन हतः बाली** - अस्मिन् उदाहरणे 'बाली' उक्तं कर्म अस्ति तस्य हननक्रियायां 'रामः' 'स्वतन्त्रः कर्ता' इत्यनेन रामशब्दस्य कर्तसंज्ञा एवञ्च बाणः अत्यधिकः सहायकः अतः तस्य '**साधकतमं करणम्**' इत्यनेन तृतीया विभक्तिः भवति। कर्मवाच्यस्य भाववाच्यस्य वा अनुक्तकर्तरि अपि तृतीया विभक्तिः भवति। यथा - रामेण लेखः लिख्यते। (कर्मवाच्ये) तेन हस्यते (भाववाच्ये), **बालकेन** शय्यते।

**(१५) सहयुक्तेऽप्रधाने** (पा. सू. २. ३. १९) -सहार्थेन युक्ते अप्रधाने तृतीया स्यात्। अर्थात् सह-साकं समं-सार्धं-शब्दानां योगे तृतीया विभक्तिः भवति। ) यथा -

पुत्रेण सह आगतः पिता । अस्मिन् वाक्ये आगमनक्रियायां पुत्रः अप्रधानः अस्ति अतः प्रकृतसूत्रेण 'पुत्र' शब्दे तृतीया विभक्तिः अस्ति। एवमेव- रामेण साकं सीता वनम् अगच्छत्। गुरुणा सार्धं शिष्यः पाठशालां गच्छति। जनन्या समं पुत्रः आपणं गच्छति।

**(१६) अपवर्गे तृतीया** (पा. सू. २. ३. ६) - अपवर्गस्य आशयः फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। यत्र फलप्राप्तिः इत्यस्य अर्थस्य ज्ञानं भवति तत्र कालवाचकस्य मार्गवाचकस्य च शब्दस्य निरन्तरसंयोगे तृतीया भवति। यथा -

अह्ना क्रोशेन वा अनुवाक्ः अधीतः। अत्र अहन् पर्यन्तं अध्ययनस्य अत्यन्तसंयोगे फलप्राप्तिः गम्यते अतः कालवाचके 'अहन्' शब्दे अध्वावाचके 'क्रोश' शब्दे च प्रकृतसूत्रेण तृतीया विभक्तिः अस्ति।

**(१६) येनाङ्गविकारः** (पा. सू. २. ३. २०) - येन विकृत-अङ्गेन अङ्गिनः विकारो लक्ष्यते तस्मिन् विकृताङ्गे तृतीया विभक्तिः भवति। यथा -

**नेत्रेण** काणः, **कर्णेनः** बधिरः, **पादेन** खञ्जः, **शिरसा** खल्वाटः।

**(१७) इत्थंभूतलक्षणे** (पा. सू. २. ३. ३१) - येन चिह्नेन कस्यचिद् अभिज्ञानं भवति तस्मिन् चिह्नवाचिनि शब्दे तृतीया विभक्तिः भवति। कस्यचिदपि लक्षणस्य ज्ञानं भवति तत्र लक्षणवाचके शब्दे तृतीयाविभक्तिः। यथा -

स जटाभिः तापसः प्रतीयते। अस्मिन् वाक्ये 'जटा' इति लक्षणवाचकेन शब्देन 'तापसः' इत्यस्य ज्ञानं भवति अतः प्रकृतसूत्रेण लक्षणवाचके 'जटा' शब्दे तृतीया विभक्तिः।

**(१८) हेतौ** (पा. २. ३. २३) - हेतुवाचिशब्दे तृतीया विभक्तिः भवति। हेतु शब्दः कारणप्रयोजनपर्यायः। अतः अस्य शब्दस्यार्थे द्योतिते सति तृतीया भवति। यथा -

पुण्येन हरि: दृष्ट:। स: अध्ययनेन वसति। विद्यया यश: वर्धते।

## **सम्प्रदानकारकम्** (चतुर्थी विभक्ति:)

**(१९) कर्मणा यमभिप्रैति स सम्प्रदानम्** (पा. सू. १.४.३२)– दानस्य कर्मणा कर्ता यं सन्तुष्टं कर्तुम् इच्छति स: सम्प्रदानम् इति कथ्यते। सम्यक् प्रदीयते यस्मै तत् सम्प्रदानम्। अर्थात् कस्यापि जनस्य दानक्रियाया: कर्मद्वारा य: अभिप्रेत: भवति, तस्य सम्प्रदानसंज्ञा भवति। च

**(२०) चतुर्थी सम्प्रदाने** (पा. सू. १.४.१३)– यस्य सम्प्रदानसंज्ञा भवति तस्मिन् शब्दे चतुर्थी विभक्ति: भवति। उदाहरणम् –

नृप: निर्धनाय धनं यच्छति। अत्र धनं दान–क्रियाया: कर्म अस्ति। एतेन च 'निर्धन:' अभिप्रेत:। अत: 'निर्धन' शब्दस्य सम्प्रदानसंज्ञा 'चतुर्थी सम्प्रदाने' इत्यनेन च चतुर्थी विभक्ति: भवति।

**(२१) रुच्यर्थानां प्रीयमाण:** (पा. सू. १.४.३३)– रुच्यर्थानां धातूनां प्रयोगे य: प्रीयमाण: भवति तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्ति: भवति यथा –

भक्ताय रामायणं रोचते।बालकाय मोदका: रोचन्ते। गणेशाय दुग्धं स्वदते।

**(२२) धारेरुत्तमर्ण:** (पा. १.४.३५) – धृञ् (धारणे) धातो: प्रयोगे य: उत्तमर्ण: (ऋणदाता) भवति तस्य सम्प्रदानसंज्ञा स्यात्, सम्प्रदाने च चतुर्थी विभक्ति: भवति। यथा –

देवदत्त: यज्ञदत्ताय शतं धारयति। वाक्येऽस्मिन् ऋणदाता यज्ञदत्त: उत्तमर्ण: अस्ति।

**(२३) स्पृहेरीप्सित:** (पा. १.४.३६) – स्पृह् (ईप्सायां) धातो: प्रयोगे य: ईप्सित: भवति तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्ति: भवति। यथा–

बालक: पुष्पाय स्पृहयति।

**(२४) क्रुधद्रुह्येर्ष्यासूयार्थानां यं प्रति कोप:** (पा. १.४.३७) – क्रुधादि–अर्थानां धातूनां प्रयोगे यं प्रति कोप: क्रियते तस्य सम्प्रदानसंज्ञा भवति सम्प्रदाने च चतुर्थी विभक्ति: भवति। क्रुध: = क्रोध:, द्रुह्= अपकार:, ईर्ष्य = अक्षमा, असूय:= गुणेषु दोषदर्शनम्। यथा –

पिता पुत्राय क्रुध्यति। किंकर: नृपाय द्रुह्यति। दुर्जन: सज्जनाय ईर्ष्यति।

**(२५) नम: स्वस्तिस्वाहास्वधालंवषड्योगाच्च** (पा. २.३.१९)– नम:, स्वस्ति, स्वाहा, स्वधा, अलं, वषट् इति शब्दानां योगे चतुर्थी विभक्ति: भवति।

नम: (नमस्कार) = रामाय नम:। स्वस्ति (कल्याण)= गणेशाय स्वस्ति। स्वाहा (आहुति)= प्रजापतये स्वाहा। स्वधा (हवि का दान)= पितृभ्य: स्वधा। वषट् (हवि का दान)= सूर्याय वषट्। अलम् (समर्थ)= दैत्येभ्य: हरि: अलम्।

**(२६) तादर्थ्ये चतुर्थी वाच्या (वा.)**– तदर्थस्य भाव: तादर्थ्यम्। यस्मै प्रयोजनाय या क्रिया क्रियते तस्मिन् प्रयोजनवाचिनि शब्दे चतुर्थी विभक्ति: भवति। इयं चतुर्थी उपकार्योपकारक–भावसम्बन्धविवक्षायां उपकार्यवाचकात् शब्दात् भवति। यथा –

स: मोक्षाय हरिं भजति। बालक: दुग्धाय क्रन्दति। काव्यं यशसे भवति।

## **अपादानकारकम्** (पञ्चमी विभक्तिः)

**(२७) ध्रुवमपायेऽपादानम्** (पा. सू. १. ४. २४) – यः निश्चितः भवति स ध्रुवः कथ्यते अपाये सति यद् ध्रुवं तस्य अपादान संज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

'धावतोऽश्वात् पतति' – अस्मिन् वाक्ये धावनक्रियायुक्तः अश्वः ध्रुवः अस्ति। तस्मात् कस्यचित् जनस्य पतनक्रिया अर्थात् वियोगः भवति अतः ध्रुवमपायेऽपादानम् इति सूत्रेण धावनक्रियायुक्तस्य 'अश्व' शब्दस्य अपादानसंज्ञा भवति।

एवमेव 'नृपः ग्रामात् आगच्छति'। अस्मिन् वाक्ये 'ग्राम' ध्रुवः=स्थिरः अवधिभूतः अस्ति। ग्रामात् नृपस्य विश्लेषः=वियोगः भवति। अतः 'ग्राम' शब्दस्य अपादानसंज्ञा, अपादाने पञ्चमी विभक्तिः।

**(२८) भीत्रार्थानां भयहेतुः** (पा. सू. १. ४. २५) – भयार्थानां रक्षार्थानां च धातूनां प्रयोगे भयस्य यद् हेतुः अस्ति तस्य अपादान संज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति यथा –

बालकः सिंहात् बिभेति। नृपः दुष्टात् रक्षति/त्रायते।

**(२८) वारणार्थानामीप्सितः** (पा.सू. १.४.२६) – वारणार्थानां धातूनां प्रयोगे यः ईप्सितः अर्थः भवति तस्य कारकस्य अपादानसंज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

कृषकः यवेभ्यः गां वारयति।

**(२९) आख्यातोपयोगे** (पा.सू. १.४.२९) – यस्मात् नियमपूर्वकं विद्या गृह्यते तस्य शिक्षकादिजनस्य अपादानसंज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

शिष्यः उपाध्यायात् अधीते।

छात्रः शिक्षकात् पठति।

**(३०) जनिकर्तुः प्रकृतिः** (पा.सू. १. ४. ३०) – जन् धातोः यः कर्त्ता, तस्य या प्रकृतिः (कारणम्=हेतुः) तस्य अपादानसंज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

गोमयात् वृश्चिकः जायते।

कामात् क्रोधः जायते।

**(३१) भुवः प्रभवः** (पा.सू. १. ४. ३१) – कस्यचिदपि उत्पद्यमानस्य पदार्थस्य यत् प्रथमं प्रकाशस्थानं भवति तस्य अपादानसंज्ञा। सूत्रानुसारेण भूधातोः यः कर्ता, तस्य यद् उत्पत्तिस्थानं, तस्य अपादान संज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

'गङ्गा हिमालयात् प्रभवति।' अस्मिन् वाक्ये गङ्गायाः प्रथमः प्रभवः = 'प्रकाशस्थानं' 'हिमालयः' अस्ति।

एवमेव 'काश्मीरेभ्यः वितस्तानदी प्रभवति' इति अस्मिन् वाक्ये वितस्तायाः प्रथमः प्रभवः = 'प्रकाशस्थानं काश्मीरः शब्दस्य अपादान संज्ञा फलतः पञ्चमी विभक्तिः अस्ति।

## षष्ठी विभक्तिः–

**( ३२ ) षष्ठी शेषे** (पा.सू.२.३.५०) – कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः, तत्र षष्ठी विभक्तिः भवति।

सम्बन्धसामान्ये षष्ठी विभक्तिः भवति। कारकान्तर्गते 'सम्बन्धः' इत्यस्य परिगणनं न भवति। यतः अस्य क्रियया सह साक्षात् अन्वयः न भवति। कारके तु तदेव यस्य क्रियया सह साक्षात् सम्बन्धः दृश्यते। अतएव अस्य सूत्रस्य अर्थः भवति यत् यत्र कारकप्रातिपदिकार्थभिन्नः स्वस्वामिभावादिसम्बन्धः दृश्यते स शेषः। तस्मिन् शेषे अर्थे षष्ठी विभक्तिः भवति। उदाहरणम्– 'राज्ञः पुरुषः' – अस्मिन् वाक्ये राजा स्वामी पुरुषः स्वः (सेवकः)। कारकप्रातिपदिकार्थभिन्नः किन्तु स्वस्वामिभावादिसम्बन्धः दृश्यते अतः प्रकृतसूत्रेण 'राजन्' पदे षष्ठी विभक्तिः।

विशेषः – अयं सम्बन्धः अनेकविधः भवति। यथा –

स्वस्वामिभावादिसम्बन्धः – **राज्ञः पुरुषः** ।

जन्यजनकभावसम्बन्धः – **दशरथस्य पुत्रः।**

अवयवावयविभावसम्बन्धः – **पशोः पादः** ।

आधाराधेयभावसम्बन्धः – **वृक्षस्य शाखा** ।

प्रकृतिविकृतिभावसम्बन्धः – **क्षीरस्य विकारः** ।

समूहसमूहिभावसम्बन्धः – **गवां समूहः** ।

समीपसमीपिभावसम्बन्धः – **कुम्भस्य स्वामी।**

पाल्यपालकभावसम्बन्धः – **पृथिव्याः स्वामी।**

**( ३३ ) षष्ठी हेतुप्रयोगे** (पा.सू. २. ३. २६) – हेतु शब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अर्थात् यस्मिन् वाक्ये हेतुशब्दस्य प्रयोगः दृश्यतेतथा च कश्चित् हेतुः अपि दृष्टिगोचरः भवति तत्र हेतुवाचके शब्दे षष्ठीविभक्त्याः प्रयोगः भवति। यथा –

**अन्नस्य हेतोः वसति**। अत्रास्मिन् वाक्ये हेतुशब्दस्य प्रयोगः अस्ति तथा च अन्नरूपो हेतुः अपि दृश्यते अतः प्रकृतसूत्रेण हेतुवाचके 'अन्न' शब्दे षष्ठीविभक्तिः।

यदा बहुषु कस्यचित् एकस्य जातिगुणक्रियाभिः विशेषता प्रदर्श्यते तदा विशेषणशब्दैः सह ष्ठन्

**( ३४ ) कर्तृकर्मणोः कृति** (पा.सू. २.३.६५) – कृतप्रत्यययोगे कर्तरि कर्मणि च षष्ठी स्यात्।

अर्थात् कृत्प्रत्ययस्य प्रयोगे सति कर्तरि कर्मणि च षष्ठी विभक्त्याः विधानं भवति।

यथा – **कृष्णस्य कृतिः । जगतः कर्ता कृष्णः ।**

**( ३५ ) तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्** (पा. सू. २. ३. ७२) – तुल्यवाचिशब्दानां योगे षष्ठी अथवा तृतीया विभक्तिः भवति यथा –

सुरेशः महेशस्य (महेशेन वा) तुल्यः अस्ति।

सीता गीतायाः (गीतया वा) तुल्या विद्यते।

## अधिकरणकारकम् (सप्तमी विभक्तिः)

**(३६) आधारोऽधिकरणम्** (पा. सू. १. ४. ४५)– कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः अधिकरणकारकं स्यात्। क्रियायाः सिद्धौ यः आधारः भवति तस्य अधिकरणसंज्ञा भवति ।

**(३७) सप्तम्यधिकरणे च** (पा. सू. २. ३. ३६) – अधिकरणे सप्तमी स्यात्।

आधारः त्रिविधः भवति –

१. औपश्लेषिकः – संयोगादि सम्बन्धः। यथा – कटे आस्ते।

२. वैषयिकः – विषयेण समबन्धः। यथा – स्थाल्यां पचति।

३. अभिव्यापकः – सर्वत्र व्यापकरूपः। यथा – सर्वस्मिन् आत्मास्ति।

**(३७) यस्य च भावेन भावलक्षणम्** (पा. सू. २. ३. ३७) – यस्य क्रियया क्रियान्तरं लक्ष्यते ततः स्समी स्यात् । अर्थात् यदा एकक्रियायाः अनन्तरं अपरा क्रिया भवति तदा पूर्वक्रियायां तस्याश्च कर्तरि सप्तमी विभक्तिः भवति। यथा –

रामे वनं गते दशरथः प्राणान् अत्यजत् ।

सूर्ये अस्तं गते सर्वे बालकाः गृहम् अगच्छन् ।

**(३८) यतश्च निर्धारणम्** (पा. सू. २. ३. ४१) – जातिगुणक्रियासंज्ञाभिः समुदायात् एकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ भवतः। अर्थात् यत्र कस्माच्चिदपि समुदायात् जात्या गुणेन क्रियया संज्ञया वा कस्यचिदपि पृथक्करणं भवति तदेव निर्धारणं कथ्यते। अतः यस्मात् पृथक्करणं भवति तस्मात् समुदायवाचकात् शब्दात् षष्ठीसप्तम्यौ भवतः।

उदाहरणम् –

**जात्या** – नृणां नृषु वा ब्राह्मणः श्रेष्ठः ।

**गुणेन** – गवां गोषु वा कृष्णा बहुक्षीरा ।

**क्रियया** – गच्छतां गच्छत्सु वा धावञ्छीघ्रः ।

**संज्ञया** – छात्राणां छात्रेषु वा मैत्रः पटुः ।

❀ ❀ ❀

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

(१) 'अभितः' शब्दस्य योगे विभक्तिः भवति –

(क) चतुर्थी (ख) पंचमी

(ग) द्वितीया (घ) तृतीया ( )

(२) 'सह' शब्दस्य योगे विभक्तिः भवति–

(क) तृतीया (ख) चतुर्थी

(ग) पंचमी (घ) षष्ठी ( )

(३) कर्मवाच्यस्य अनुक्ते कर्तरि विभक्तिः भवति –

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) पंचमी ( )

(४) अङ्गविकारे विभक्तिः भवति –

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) सप्तमी ( )

(५) अधस्तनेषु चतुर्थी विभक्तेः कारणम् अस्ति–

(क) नमः (ख) सह

(ग) अभितः (घ) प्रति ( )

(६) अधस्तनेषु पंचमीविभक्तेः कारणम् अस्ति –

(क) नमः (ख) अनन्तरम्

(ग) अधोऽधः (घ) खल्वाटः ( )

(७) अपादाने विभक्तिः भवति–

(क) द्वितीया (ख) तृतीया

(ग) पंचमी (घ) षष्ठी ( )

(८) रक्षार्थकधातूनां योगे विभक्तिः भवति–

(क) षष्ठी (ख) सप्तमी

(ग) पंचमी (घ) तृतीया ( )

(९) कारकाणां संख्या अस्ति –

(क) सप्त (ख) अष्ट

(ग) षट् (घ) नव ( )

(१०) सम्बोधने विभक्तिः भवति –

(क) द्वितीया (ख) प्रथमा

(ग) तृतीया (घ) षष्ठी ( )

## अतिलघूत्तरात्मकप्रश्नाः –

अधस्तनेषु रेखाङ्कितशब्देषु विभक्तेः कारणं लिखत –

१. ग्रामं परितः वृक्षाणि सन्ति।

२. कविषु कालिदासः श्रेष्ठः।

३. मुक्तये हरिं भजति।

४. रामः चतुर्दश वर्षाणि वने अवसत्।

५. बालकः सिंहात् बिभेति।

६. ब्रह्मणः प्रजाः प्रजायन्ते।

७. हिमालयात् गङ्गा प्रभवति।

८. रामः देवदत्ताय शतं धारयति।

९. गुरवे नमः।

## लघूत्तरात्मकप्रश्नाः –

(१) अधोलिखित कारकाणां लक्षणानि उदाहरणानि च लिखत।

(क) करणम्

(ख) सम्प्रदानम्

(ग) अपादानम्

(घ) अधिकरणम्

(२) कारकस्य परिभाषा लेखनीया।

(३) संस्कृते कति कारकाणि सन्ति तेषां नामानि लिखत।

## योग्यताविस्तार खण्डः –

**(क) कोष्ठकगतशब्देषु उचितविभक्तेः प्रयोगं कृत्वा रिक्तस्थानानि पूरयत।**

१. नास्ति........................ समः शत्रुः। (क्रोधः)

२. शिष्या ..................... विद्यां गृह्णन्ति। (गुरु)

३. माता ....................... स्निह्यति। (शिशु)

४. ..................... भीतः बालकः क्रन्दति। (चौर)

५. ................. क्रोधः जायते। (काम)

६. अलम् ..............................। (विवाद)

७. ..........................परितः जलम् अस्ति। (नदी)

८. .......................... रामायणं रोचते। (भक्त)

९. ....................... बहिः छात्राः कोलाहलं कुर्वन्ति। (कक्षा)

१०. भिक्षुकः ................ भिक्षां याचते। (नृप)

११. जनकः ..................... क्रुध्यति। (पुत्र)

**( ख ) कोष्ठकेभ्यः शुद्धम् उत्तरं चित्वा रिक्तस्थानानि पूरयत –**

१. ........................ सह सुदामा वनम् अगच्छत्। **( कृष्णस्य / कृष्णेन )**

२. दिनेशः .......................... पुस्तकं यच्छति। **( रामं / रामाय )**

३. ...................... नमः। **( शिवः / शिवाय )**

४. पिता ....................... क्रु ध्यति। **( पुत्रे / पुत्राय )**

५. माता ..................... स्निह्यति। **( पुत्रे / पुत्रात् )**

६. ................ परितः क्षेत्राणि सन्ति। **( ग्रामस्य / ग्रामं )**

७. ..........................मोदकाः रोचन्ते। **( बालकाय / बालकाः )**

८. हरिः.............. ......अधिशेते। **( वैकुण्ठे / वैकुण्ठम् )**

**( ग ) अधोलिखितशब्देषु उचितविभक्तिप्रयोगं कृत्वा वाक्यरचनां कुरुत।**

१. विना

२. धिक्

३. बहिः

४. बिभेति

५. काणः

६. अन्तरा

७. पटुतरः

८. पटुतमः

९. स्वाहा

१०. उपवसति

११. अधः

१२. कुशलः

**( घ ) अधोलिखितवाक्यानि संशोधनीयानि –**

१. विद्यालयस्य अभित: वाटिका।

२. ग्रामस्य परित: जलम् अस्ति।

३. श्रमस्य विना फलं न मिलति।

४. अहं रेलयानात् ग्रामं गमिष्यामि।

५. महावीरं नम:।

६. हरि: मथुरायाम् अधितिष्ठति।

७. शिव: पार्वत्या सह तिष्ठति।

८. अलं विवादम्

**( ङ) 'क' खण्डं 'ख' खण्डेन सह योजयत।**

| | क-खण्डः | ख-खण्डः |
|---|---|---|
| १. | धारिधातुयोगे | षष्ठी |
| २. | रुच्धातुयोगे | तृतीया |
| ३. | अङ्गविकारे | चतुर्थी |
| ४. | सम्बन्धे | चतुर्थी |
| ५. | अधिशीधातुयोगे | सप्तमी |
| ६. | वारिधातुयोगे | द्वितीया |
| ७. | यस्य च भावेन भावलक्षणम् | प्रथमा |
| ८. | कर्मवाच्यस्य कर्मणि | पञ्चमी |

❀ ❀ ❀

# पञ्चमः खण्डः

# रचनात्मक-कार्यम्

## (क) प्रदत्तरूपरेखया कथासंयोजनम् /क्रमयोजनम्/सङ्केताधारित-वर्णनम्।

१. रचनात्मक-लेखनात् पूर्वं लेखकस्य मस्तिष्के सर्वे एव बिन्दवः स्पष्टाः भवेयुः। यथा मूर्तिकारः मूर्तिनिर्माणात् पूर्वं प्रतिमायाः एकं वैचारिकं आकारं स्वमनसि ध्यायेत्। लेखनस्य तदनुकूलं एकं स्पष्टं क्रमं च रचयेत्।

२. रूपरेखायाः पूर्णतया अनुसरणं भवेत्। कोऽपि बिन्दुः न विस्मर्तव्यः। बिन्दूनां क्रमः अपि रूपरेखायाः अनुकूलः भवति।

३. बिन्दूनां संयोजनं सहजं प्राकृतिकं वा भवेत्। बिन्दूनां रूपरेखायाः च क्रमयोजने कल्पनायाः आवश्यकता भवति।

४. संयोजनं /वर्णनं सर्वथा व्याकरणदोषरहितं भवेत्। भाषा सूक्तिभिः, लोकोक्तिभिः, वाक्रीतिभिः च विभूषिता, सरला, सहजा भवेत्।

५. संयोजने/वर्णने त्रीणि तत्त्वानि विशेषरूपेण ध्यातव्यानि, तद्यथा-सुसम्बद्धता, रोचकता, वर्णनकुशलता च। अभ्यासेन कल्पनाशक्त्या च शनैः शनैः अभ्यासः भवति।

अत्र कथानां रूपरेखाः, क्रमयोजनं, संकेतानुसार-वर्णनं च उदाहरण-रूपेण प्रस्तूयन्ते।

### कथासंयोजनम् -

प्रदत्तरूपरेखया कथासंयोजनं करणीयम् -

वृद्धः व्याघ्रः..............जाले बद्धः...........न मुक्तः...........मूषकः..........मोचयितुं प्रयासः...........अट्टहासम्..........क्षुद्रः जीवः........जालकर्तनं...........बहिः कृतवान्।

एकस्मिन् वने वृद्धः व्याघ्रः निवसति स्म। तेन एकः शशकः जाले बद्धः। सः शशकः प्रचुरप्रयासेन अपि मुक्तः न अभवत्। जाले बद्धं शशकम् अवलोक्य एकः मूषकः तत्र अगच्छत्। तेन मूषकेन शशकं मोचयितुं प्रयासः कृतः। मूषकस्य इदं कृत्यं दृष्ट्वा अन्ये जीवाः अट्टहासम् अकुर्वन्। अनन्तरं तैः ज्ञातं यत् क्षुद्रः जीवः अपि प्रयासं कर्तुं शक्नोति। मूषकः जालकर्तनं कृत्वा शशकं बहिः कृतवान्।

### क्रमयोजनम् -

**क्रमरहितवाक्यानि समुचितक्रमानुसारं लिखत -**

१. चतुर्षु न कोऽपि पुत्रः यष्टिका-पुञ्जं त्रोटयितुम् अशकत्।

२. कृषकस्य चत्वार: पुत्रा: सर्वदा परस्परं कलहं कुर्वन्ति स्म।

३. कृषक: पुत्रेभ्य: कथयति यत् ते एकैकां यष्टिकां सरलतया त्रोटितवन्त:।

४. एकैकं पुत्रम् आहूय स: तं यष्टिका-पुञ्जं त्रोटयितुं कथयति।

५. सत्यमेव कथ्यते यत्- 'संघे शक्ति: कलौ युगे'।

६. प्रत्येकं पुत्र: सरलतया यष्टिका: त्रोटयति।

७. तदा स: कृषक: तान् पुत्रान् कथयति यत् ते एकैकां यष्टिकां त्रोटयेयु:।

८. तदा ते ज्ञातवन्त: यत् यदि ते संघे स्थिता: भविष्यन्ति तदा शक्तिसम्पन्ना: भविष्यन्ति।

**समुचित-क्रमानुसारम्-**

१. कृषकस्य चत्वार: पुत्रा: सर्वदा परस्परं कलहं कुर्वन्ति स्म।

२. एकैकं पुत्रम् आहूय स: तं यष्टिका-पुञ्जं त्रोटयितुं कथयति।

३. चतुर्षु न कोऽपि पुत्र: यष्टिका-पुञ्जं त्रोटयितुम् अशकत्।

४. तदा स: कृषक: तान् पुत्रान् कथयति यत् ते एकैकां यष्टिकां त्रोटयेयु:।

५. प्रत्येकं पुत्र: सरलतया यष्टिका: त्रोटयति।

६. कृषक: पुत्रेभ्य: कथयति यत् ते एकैकां यष्टिकां सरलतया त्रोटितवन्त:।

७. तदा ते ज्ञातवन्त: यत् यदि ते संघे स्थिता: भविष्यन्ति तदा शक्तिसम्पन्ना: भविष्यन्ति।

८. सत्यमेव कथ्यते यत् -'संघे शक्ति: कलौ युगे'।

**प्रदत्त संकेतानुसारं वर्णनं लिखत -**

रेलस्थानकम्, महान् कोलाहल:, भारवाहका:, रेलयानानि, हरितदीपं, रक्तदीपं, विटिका, पृच्छावातायनम्, जलपानगृहाणि, कार्यालय:, सुन्दरं दृश्यम्।

एकदा मम विद्यालयस्य केचन छात्रा: भ्रमणार्थं रेलयानेन जयपुरनगरम् अगच्छन्। वयं सर्वे छात्रा: जयपुर-रेलस्थानक ात् बहि: अवातराम। तत्र महान् कोलाहल: श्रूयते स्म। तत्र एक: सुन्दर: कार्यालय: आसीत्। अस्माभि: तत्र उपस्थितम् एकम् अधिकारिणम् निवेदित यत् अस्माकं प्रयोगार्थं भारवाहकानां व्यवस्थां करोतु। येन वयं जलयानं ग्रहीतुं शक्नुम:। अनन्तरं वयं एकं सुन्दरं दृश्यम् अवलोकयितुं रेलस्थानकात् बहि: गता:। तत्र बहव: रेलयानानि आसन्। रेलयानं हरितदीपस्य संकेतं प्राप्य चलति, रक्तदीपम् अवलोक्य रेलचालक: रेलयानं वारयति। रेलस्थानके यात्रिणां सम्मर्द: आसीत्। ते स्व-स्व स्थानं गच्छन्ति स्म। वयमपि स्व विद्यालयं निवर्तयामास।

## अभ्यासः

**( क ) प्रदत्तरूपरेखया कथासंयोजनं करणीयम् -**

१. विशाल: वृक्ष:..........खगा: वसन्ति..........बुभुक्षिता:.........इतस्तत: भ्रमन्ति.........तण्डुलकणान् अपश्यन्...........खादन्ति..........जालेन बद्धा:........किं करणीयम्.........सर्वे जालेन सह एव एकं स्वमित्रम् अगच्छन्........मित्रम् एक: मूषक:.........जालं दन्तै: अकर्तयत्.........स्वतन्त्रा:........सुखं तु एकतायाम् एव विद्यते।

२. नर: सरोवरतटे अभ्रमत्.........चिन्तने रत:.........वानराणां शब्दै: तस्य ध्यान-भङ्ग: अभवत्........वानरा: नातिदूरे.......धावितुम् आरभत्.........वानरा: अपि अनुधावितवन्त:.......मा धाव, भयं त्यक्त्वा.......स्थिर: भव.........वृद्धजनस्य उच्च-स्वरं.......तत्रैव स्थितवन्त:..........वानरसमूह: पलायित:.........ज्ञानचक्षुषी उन्मीलिते........आपद्भ्य: मुक्ति: दृढसङ्कल्पेन,...........न ताभ्य: पलायनेन। किं भवन्त: जानन्ति एष:.........एष: आसीत् स्वामी..............।

**( ख ) क्रमरहितवाक्यानि समुचितक्रमानुसारं लिखत -**

**अ -**

१. तस्य गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्।
२. श्रेष्ठिनि पृष्टे स: आह- नद्दीतटात् स: श्येनेन हृत:।
३. सुचिरेण कालेन प्रत्यागत: स: श्रेष्ठिनं स्वतुलाम् अयाचत्।
४. तयो: वृत्तान्तं श्रुत्वा धर्माधिकारिभि: विहस्य द्वावेव तुला-शिशु-प्रदानेन सन्तोषितौ।
५. आसीत् कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्र:।
६. श्रेष्ठि: अवदत् - 'मूषकै: भक्षिता तुला।'
७. जीर्णधन: तुलां कस्यचित् श्रेष्ठिन: गृहे निक्षेपरूपेण स्थापयित्वा देशान्तरम् अगच्छत्।
८. श्रेष्ठिन: अनुमत्या जीर्णधन: तस्य पुत्रेण सह स्नानार्थं नदीमगच्छत्।

**ब -**

१. अस्ति च सायं समय:।
२. मासोऽयमाषाढ:।
३. अस्मिन् समये एक: षोडशवर्ष-देशीयो गौरयुवा हयेन पर्वतश्रेणी: उपर्युपरि गच्छति स्म।
४. अस्तं जिगमिषुर्भगवान् भास्कर:।
५. एष सुघटितदृढ-शरीर:।
६. कोऽपि शिववीरस्य विश्वासपात्रं सिंहदुर्गात् तस्यैव पत्रमादाय तोरणदुर्गं प्रयाति।
७. एष: श्याम-श्यामैर्गुच्छ-गुच्छै: कुचितै:-कुचितै: कचकलापै: कमनीयकपोलपालि:।
८. एष: समाच्छादित-ललाट-कपोल-नासाग्रोरोष्ठ: प्रसन्नवदनाम्भोजप्रदर्शित:।

**सङ्केताधारित-वर्णनम् –**

(स) प्रदत्त संकेतानुसारं वर्णनं लिखत –

१. महाकविः कालिदासः, श्रेष्ठः कविः, सप्त-कृतयः, प्रसिद्धतमं नाटकं, उपमा-प्रयोगः, वैदर्भी रीतिः, महाकाव्यद्वयं, खण्डकाव्यद्वयं, कलापक्षः, भावपक्षः, विश्वसाहित्ये स्थानम्।

२. अस्माकं, मातृभूमौ, स्मरिष्यति, अत्र, मधुरतराणि, परमेश्वराः, नानाविधानि, जन्मभूमिश्च।

## (ख) अनुवादकार्यम् –

**अनुवादकार्यार्थं किंचित् सङ्केताः ध्यातव्याः –**

**(क) लट् + प्रथमा + प्रथमपुरुषः –**

| | |
|---|---|
| छात्र पढ़ता है। | छात्रः पठति। |
| वे दोनों हँसते है। | तौ हसतः। |
| आप यहाँ आते हैं। | भवान् अत्र आगच्छति। |
| आप लिखती है। | भवती लिखति। |
| वहाँ क्या हो रहा है? | तत्र किं भवति ? |

**(ख) लट् + प्रथमा + मध्यमपुरुषः –**

| | |
|---|---|
| तुम लिखते हो। | त्वं लिखसि। |
| तुम दोनों कहते हो। | युवां वदथः। |
| तुम सब पढ़ते हो। | यूयं पठथ। |

**(ग) लट् + प्रथमा + उत्तमपुरुषः –**

| | |
|---|---|
| मैं देखता हूँ। | अहं पश्यामि। |
| हम दोनों खेलते हैं। | आवां क्रीड़ावः। |
| हम सब जीतते हैं। | वयं जयामः। |

**(घ) लोट् + द्वितीया –**

| | |
|---|---|
| वह खाना खाये। | सः भोजनं खादतु। |
| तू गाँव को जा। | त्वं ग्रामं गच्छ। |
| मैं यहाँ से चलूँ। | अहं इतः चलानि। |

**(ङ) लृट् + द्वितीया द्विकर्मक–**

| | |
|---|---|
| भारत शत्रु से युद्ध जीतेगाा। | भारतः शत्रुं युद्धं जेष्यति। |
| शिक्षक शिष्य से प्रश्न पूँछेगा। | शिक्षकः शिष्यं प्रश्नं प्रक्ष्यति। |
| ग्वाला गाँव से गाय को ले जायेगा। | गोपः ग्रामं गां नेष्यति। |

**(च) लङ्+ तृतीया –**

| | |
|---|---|
| राजा के साथ सेनापति चला। | भूपतिना सह सेनापतिः अचरत्। |

| | |
|---|---|
| संन्यासी के साथ कवि ने गाया। | यतिना सार्धं कवि अगायत्। |
| मुनि ने सत्य से संसार को जीता। | मुनि: सत्येन लोकम् अजयत्। |

**(छ) विधिलिङ्ग + चतुर्थी –**

| | |
|---|---|
| उसे उस ब्राह्मण को धन देना चाहिए। | स: तस्मै विप्राय धनं दद्यात्। |
| तुमे किस शिष्य को ज्ञान देना चाहिए ? | त्वं कस्मै शिष्याय ज्ञानं वितरे: ? |
| शिष्य का हित हो। | शिष्याय हितं भवेत्। |

**(ज) सर्वनाम पुल्लिङ्ग + पंचमी**

| | |
|---|---|
| उस वृक्ष से यह पता गिरा। | तस्माद् वृक्षात् एतत् पत्रम् अपतत्। |
| इस घोड़े से वह मनुष्य गिरता है। | अस्माद् अश्वात् स नर: पतति। |
| यह शिष्य उस गुरु से पढ़ता है। | एष: शिष्य: तस्माद् गुरो: अधीते। |

**(झ) सर्वनाम स्त्रीलिङ्ग + षष्ठी**

| | |
|---|---|
| यह उस बालिका की पुस्तक है। | इदं तस्या: बालिकाया: पुस्तकम् अस्ति। |
| वह कन्या इस बकरी का दूध चाहती है। | सा कन्या अस्या: अजाया: दुग्धम् अभिलषति। |
| वह बालिका किस कन्या की बहिन है ? | सा बालिका कस्या: कन्याया: भगिनी अस्ति ? |

**(ञ) युष्मद् + सप्तमी**

| | |
|---|---|
| तुझमें सत्य है। | त्वयि सत्यं वर्तते। |
| तुम दोनों में ज्ञान है। | युवयो: ज्ञानम् अस्ति। |
| तुम सब में ईश्वर है। | युष्मासु ईश्वर: अस्ति। |

**(ट) अस्मद्**

| | |
|---|---|
| कार्य पूरा करने पर मैं विद्यालय गया। | कार्ये कृते सति अहं विद्यालयम् अगच्छम्। |
| मेरी सत्य में श्रद्धा और निष्ठा है। | मम सत्ये श्रद्धा निष्ठा वा वर्तते। |
| हमारी ईश्वर में अभिलाषा हो। | अस्माकम् ईश्वरेऽभिलाषा वर्तताम्। |

**(ठ) परिचय: –**

| | |
|---|---|
| मेरा नाम नरेन्द्र है। | मम नाम नरेन्द्र: । |
| आपका नाम क्या है ? (पुरुष से) | भवत: नाम किम् ? |
| आपका नाम क्या है ? (महिला से) | भवत्या: नाम किम् ? |
| मैं अध्यापक हूँ। | अहम् अध्यापक:। |
| आप कौन है ? (पुरुष से) | भवान् क: ? |
| आप कौन है ? (महिला से) | भवती का ? |
| मेरे पिताजी का नाम गोपाल है। | मम पितु: नाम गोपाल:। |
| आपके पिताजी का नाम क्या है ? | (पुरुष से) भवत: पितु: नाम किम् ? |
| आपके पिता/माता का नाम क्या है? (महिला से) | भवत्या:पितु:/मातु: नाम किम् ? |

मैं बाँसवाड़ा नगर में रहता हूँ। — अहं बाँसवाड़ा नगरे निवसामि।
आप कहाँ रहते/रहती हो ? — भवान्/भवती कुत्र निवसति ?

**(ड) विविधानि वाक्यानि –**

| | |
|---|---|
| संगठन से ही भारत विश्वगुरु बनेगा। | संगठनेनैव भारतं विश्वगुरुः भविष्यति। |
| योग से शरीर स्वस्थ होता है। | योगेन शरीरं स्वस्थं तिष्ठति। |
| वेद सर्वाधिक प्रामाणिक ग्रन्थ हैं। | वेदाः सर्वाधिकाः प्रामाणिकाः ग्रन्थाः सन्ति। |
| जननी और जन्मभूमि स्वर्ग से महान् है। | जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। |
| उठो, जागो और लक्ष्यप्राप्ति तक मत रुको। | उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत। |
| सज्जनों की बात माननी चाहिए। | कर्तव्यं हि सतां वचः। |
| अनेक गुणों में एक दोष छिप जाता है। | एको हि दोषो गुणसन्निपाते निमज्जति। |
| दूसरे को उपदेश देना बहुत सरल है। | सुखमुपदिश्यते परस्य। |
| बड़ों का अनुकरण करो। | महतां पदम् अनुविधेयम्। |
| तृष्णा कभी कम नहीं होती। | तृष्णैका तरुणायते। |
| संसार में कोई भी सर्वज्ञ नहीं। | न हि सर्वविदः सर्वे। |
| बन्धु के समान कोई बल नहीं। | नास्ति बन्धुसमं बलम्। |
| योगी को संसार तिनके के समान है। | निःस्पृहस्य तृणं जगत्। |
| जो जैसा बीज बोता है वैसा ही फल प्राप्त करता है। | यो यद्वपति बीजं लभते सोऽपि तत्फलम्। |

## अभ्यासः

**(क) रिक्तस्थानेषु उचितपदानि पूरयत –**

१. इदं तस्याः .............. पुस्तकम् अस्ति (बालिका)
२. ...........सत्यं वर्तते (युष्मद्)
३. .............कृते सति अहं विद्यालयम् अगच्छम् (कार्य)
४. .............भोजनं खादतु (तत् पुँ.)
५. ..............सह सेनापतिः अचरत् (भूपतिः)
६. सः तस्मै .......... धनं दद्यात् (विप्रः)
७. ...............हितं भवेत् (शिष्यः)
८. तस्माद्................एतत् पत्रम् अपतत् (वृक्षः)
९. एषः शिष्यः तस्माद्............अधीते (गुरुः)
१०. ............ पदम् अनुविधेयम् (महत्)

**( ख )   संस्कृतानुवादं कुरुत –**

१.   वह गाँव को जाता है।
२.   आप वहाँ जाते है।
३.   वे सब यहाँ आते हैं।
४.   तू राज्य की रक्षा करता है।
५.   तुम दोनों कब भोजन बनाते हो।
६.   तुम लोग ईश्वर को प्रणाम करते हो।
७.   मैं फूल सूँघता हूँ।
८.   हम दोनों पाठशाला जाते हैं।
९.   हम वहाँ से नहीं आ रहे है।
१०.  वे सातों बालक ईश्वर का चिन्तन करते हैं।

❀ ❀ ❀